| Unhappy women's-ornaments-resembling | knowledge | a burthen | action | without. | |

तन्मया भद्रं न कृतं यदत्र मारात्मके विश्वासः कृतः ।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| tad | mayâ | bhadram | na | kṛitam | yad | atra | mâra-âtmake | vi-śvâsas | kṛitas. |
| tad, *N. sg. n.* | asmad, *I. sg.* | -ra, *N. sg. n.* | *Ind.* | kṛi, *N. sg. n. p. Pt. Pass.* | *Ind.* | *Ind.* | *Bahuv.* -ka, *L. sg. m.* (âtman). | -sa, *N. sg.* | kṛi, *N. sg. m. past Ptc. Pass.* |
| This | by me | prosperous | not | done, | that | here | in the murderous-minded | confidence | placed. |

तथा ह्युक्तं । नदीनां शस्त्रपाणीनां नखिनां शृंगिणां तथा ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| tathâ | hi | uktam, | nadînâm | śastra-pâṇînâm | nakhinâm | śṛiṅgiṇâm | tathâ, |
| *Ind.* | *Ind.* | vach, *N. sg. n. past Ptc. Pass.* | -dî, *G. pl.* | *Bahuv.* -ṇi, *G. pl. m.* | -in, *G. pl. m.* | -in, *G. pl. m.* | *Ind.* |
| Thus | for | said, | Of rivers, | of the weapon-in hand having, | of the claw possessing, | of the horn possessing | thus, |

विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ १८ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| vi-śvâsas | na | eva | kartavyas | strîshu | râjan-kuleshu | cha. | (18) |
| -sa, *N. sg.* | *Ind.* | *Ind.* | kṛi, *N. sg. m. Ptc. Fut. Pass.* | -rî, *L. pl.* | *Ttp.* -la, *L. pl.* | *Ind.* | |
| confidence | not | by any means | to be made, | in women, | in kings' families | and. | |

अपरं च । सर्वस्य हि परीक्ष्यंते स्वभावा नेतरे गुणाः ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| aparam | cha, | sarvasya | hi | pari-îkshyante | sva-bhâvâs | na | itare | guṇâs; |
| -ra, *N. sg. n.* | *Ind.* | -va, *G. sg. m.* | *Ind.* | îksh *with* pari, 3. *pl. Pres. Pass.* | *Karm.* -va, *N. pl.* | *Ind.* | -ra, *N. pl. m.* | -ṇa, *N. pl.* |
| Another | and, | Of every one | indeed | are investigated | the natural-dispositions, | not | the other | qualities; |

अतीत्य हि गुणान्सर्वान्स्वभावो मूर्ध्नि वर्तते ॥ १९ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ati-itya | hi | guṇân | sarvân | sva-bhâvas | mûrdhni | vartate. | (19) |
| i *with* ati, *Ger.* | *Ind.* | -ṇa, *Ac. pl.* | -va, *Ac. pl. m.* | *Karm.* -va, *N. sg.* | -dhan, *L. sg.* | vṛit, 3. *sg. Pres. Âtm.* | |
| excelling | for | qualities | all | the natural-disposition | at the head | stands. | |

अन्यच्च । स हि गगणविहारी कल्मषध्वंसकारी

| | | | | | |
|---|---|---|---|---|---|
| anyad | cha, | sas | hi | gagaṇa-vihârî | kalmasha-dhvaṁsa-kârî |
| -ya, *N. sg. n.* | *Ind.* | tad, *N. sg. m.* | *Ind.* | *Ttp.* -rin, *N. sg. m.* | *Ttp.* -rin, *N. sg. m.* |
| Again | and, | This | indeed | in the sky-roaming | sin-destruction-causing |

दशशतकरधारी ज्योतिषां मध्यचारी ।
dasan-sata-kara-dhârî jyotishâm madhya-chârî
*Ttp.* -rin, *N. sg. m.* -tis, *G. pl.* *Ttp.* -rin, *N. sg. m.*
ten-hundred-rays-bearing of the lights in the midst-wandering

विधुरपि विधियोगाद्ग्रस्यते राहुणासौ
vidhus api vidhi-yogât grasyate râhuṇâ asau ;
-dhu, *N. sg.* *Ind.* *Ttp.* -ga, *Ab. sg.* gras, 3 *sg. Pres. Pass.* -hu, *I. sg.* adas, *N. sg. m.*
the moon even through fate-conjuncture is devoured by Râhu he ;

लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥ २० ॥
likhitam api lalâṭe pra-ujjhitum kas sam-arthas ? (20)
likh, *Ac. sg. n. past Ptc. Pass.* *Ind.* -ṭa, *L. sg.* ujjh *with* pra, *Inf.* kim, *N. sg. m.* -tha, *N. sg. m.*
what is written even on the forehead to-escape who able ?

इति चिंतयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च । अतो
iti chintayan eva asau vyâghreṇa vi-â-pâditas khâditas cha. atas
*Ind.* chint, *N. sg. m. Ptc. Pres. Par.* *Ind.* adas, *N. sg. m.* -ra, *I. sg.* pad *with* vi *and* â, *N. sg. m. past Ptc. Pass. Caus.* khâd, *N. sg. m. past Ptc. Pass.* *Ind.* *Ind.*
Thus reflecting even he by the tiger killed, eaten and. Therefore

ऽहं ब्रवीमि कंकणस्य तु लोभेनेत्यादि । अतः सर्वथाविचारितं
aham bravîmi : kaṅkaṇasya tu lobhena iti-âdi. atas sarvathâ a-vichâritam
asmad, *N. sg.* brû, 1 *sg. Pres. Par.* -ṇa, *G. sg.* *Ind.* -bha, *I. sg.* *Ind.* *Ind.* *Ind.* *Karm.* -ta, *N. sg. n.* (*rt.* char *with* vi)
I say : 'of gold but through desire, etc.' Therefore anyhow an inconsiderate

कर्म न कर्तव्यं । यतः ।
karma na kartavyam. yatas,
-man, *N. sg.* *Ind.* kṛi, *N. sg. n. Ptc. Fut. Pass.* *Ind.*
act not to be done. For,

सुजीर्णमन्नं सुविचक्षणः सुतः सुशासिता स्त्री नृपतिः सुसेवितः ।
su-jîrṇam annam su-vichakshaṇas sutas su-sâsitâ strî nṛi-patis su-sevitas
*Karm.* -ṇa, *N. sg. n.* -na, *N. sg.* *Karm.* -ṇa, *N. sg. m.* -ta, *N. sg.* *Karm.* -ta, *N. sg f.* -rî, *N. sg.* *Ttp.* -ti, *N. sg.* *Karm.* -ta, *N. sg. m.*
Well-digested food, a well-discerning son, a well-governed wife, a prince well-served,

सुचिंत्य चोक्तं सुविचार्य यत्कृतं सुदीर्घकालेऽपि न
su-chintya cha uktam su-vichârya yad kṛitam su-dîrgha-kâle api na
chint, *with* su, *Ger.* *Ind.* vach, *N. sg. n. past Ptc. Pass.* char *with* vi, *Ger. Caus.* yad, *N. sg. n.* kṛi, *N. sg. n. past Ptc. Pass.* *Karm.* -la, *L. sg.* *Ind.* *Ind.*
Well-having reflected and spoken, well-having considered what done, in very-long-time even not

याति विक्रियां ॥ २१ ॥
yâti vi-kriyâm. (21)
yâ, 3. *sg. Pres. Par.* -yâ, *Ac. sg.*
goes to change.

एतद्वचनं श्रुत्वा कश्चित्कपोतः सदर्पमाह । आः किमेवमुच्यते ।
etad vachanam srutvâ kas - chid kapotas sa-darpam âha: âḥ kim evam uchyate?
etad, *Ac. sg. n.* -na, *Ac. sg.* sru, *Ger.* kim, *N. sg. m.* *Ind.* -ta, *N. sg.* *Avyay.* ah, 3 *sg. Perf. Par.* *Ind.* *N. sg. n.* *Ind.* vach, 3 *sg. Pres. Pass.*
This speech having heard some pigeon haughtily said: Ha, what thus is said?

वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते ।

| | | | | | |
|---|---|---|---|---|---|
| vṛiddhânâm | vachanam | grâhyam | âpad-kâle | hi | upa-sthite, |
| -dha, *G. pl. m.* | -na, *N. sg.* | grah, *N. sg. n. Ptc. Fut. Pass.* | *Ttp.* -la, *L. sg.* | *Ind.* | sthâ *with* upa, *L. sg. m. past Ptc. Pass.* |
| Of the old | the word | to be accepted | misfortune-time | for | having approached, |

सर्वत्रैव विचारेण भोजने न प्रवर्तते ॥ २२ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| sarvatra | eva | vi-châreṇa | bhojane | na | pra-vartate. | (22) |
| *Ind.* | *Ind.* | -ra, *I. sg.* | -na, *L. sg.* | *Ind.* | vṛit *with* pra, 3 *sg. Pres. Âtm.* | |
| everywhere | indeed | with reflecting | in eating | not | one engages. | |

यतः । शंकाभिः सर्वमाक्रांतमन्नं पानं च भूतले ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| yatas, | śankâbhis | sarvam | â-krântam | annam | pânam | cha | bhû-tale, |
| *Ind.* | -kâ, *I. pl.* | -va, *N. sg. n.* | kram *with* â, *N. sg. n. past Ptc. Pass.* | -na, *N. sg.* | -na, *N. sg.* | *Ind.* | *Ttp.*-la, *L. sg.* |
| For, | By apprehensions | everything | assailed, | food, | drink | and, | on the earth-surface, |

प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं नु वा ॥ २३ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| pra-vṛittis | kutra | kartavyâ | jîvitavyam | katham | nu | vâ ? | (23) |
| -tti, *N. sg.* | *Ind.* | kṛi, *N. sg. f. Ptc. Fut. Pass.* | jîv, *N. sg. n. Ptc. Fut. Pass.* | *Ind.* | *Ind.* | *Ind.* | |
| occupation | where | to be made, | to be lived | how | now | or ? | |

ईर्ष्यी घृणी त्वसंतुष्टः क्रोधनो नित्यशंकितः ।

| | | | | | |
|---|---|---|---|---|---|
| îrshyî | ghṛiṇî | tu | a-santushṭas | krodhanas | nitya-śankitas |
| -yin, *N. sg. m.* | -ṇin, *N. sg. m.* | *Ind.* | *Karm.* -ta, *N. sg. m.* (*rt.* tush *with* sam) | -na, *N. sg. m.* | *Karm.* -ta, *N. sg. m.* |
| The envious, | the censorious | but, | the dis-satisfied, | the passionate, | the constantly-suspicious, |

परभाग्योपजीवी च षडेते दुःखभागिनः ॥ २४ ॥

| | | | | | |
|---|---|---|---|---|---|
| para-bhâgya-upajîvî | cha | shaṭ | ete | duḥkha-bhâginas. | (24) |
| *Ttp.* -vin, *N. sg. m.* | *Ind.* | shash, *N.* | etad, *N. pl. m.* | *Ttp.* -gin, *N. pl. m.* | |
| the on another's-property-living | and, | six | these | misery-sharing. | |

एतच्छ्रुत्वा सर्वे कपोतास्तत्रोपविष्टाः ।

| | | | | | |
|---|---|---|---|---|---|
| etad | śrutvâ | sarve | kapotâs | tatra | upa-vishṭâs. |
| etad, *Ac. sg. n.* | śru, *Ger.* | -va, *N. pl. m.* | -ta, *N. pl.* | *Ind.* | viś, *with* upa, *N. pl. m. past Ptc. Pass.* |
| This | having heard | all | the pigeons | there | alighted. |

यतः । सुमहांत्यपि शास्त्राणि धारयंतो बहुश्रुताः ।

| | | | | | |
|---|---|---|---|---|---|
| yatas, | su-mahânti | api | śâstrâṇi | dhârayantas | bahu-śrutâs |
| *Ind.* | *Karm.* -hat, *Ac. pl. n,* | *Ind.* | -ra, *Ac. pl.* | dhṛi, *N. pl. m. Ptc. Pres. Par. Caus.* | *Bahuv.* -ta, *N. pl. m.* (*rt.* śru) |
| For, | Very-great | even | sciences | possessing, | having learned-much, |

छेत्तारः संशयानां च क्लिश्यंते लोभमोहिताः ॥ २५ ॥

| | | | | | |
|---|---|---|---|---|---|
| chhettâras | saṃ-śayânâm | cha | kliśyante | lobha-mohitâs. | (25) |
| -tṛi, *N. pl. m.* | -ya, *G. pl.* | *Ind.* | kliś, 3 *pl. Pres. Âtm.* | *Ttp.* -ta, *N. pl. m.* (*rt.* muh) | |
| dispellers | of doubts | and, | are pained | by desire-infatuated. | |

अन्यच्च । लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| anyad | cha, | lobhât | krodhas | pra-bhavati | lobhât | kâmas | pra-jâyate, |
| -ya, *N. sg. n.* | *Ind.* | -bha, *Ab. sg.* | -dha, *N. sg.* | bhû *with* pra, 3 *sg. Pres. Par.* | -bha, *Ab. sg.* | -ma, *N. sg.* | jan *with* pra. 3 *sg. Pres. Âtm.* |
| Again | and, | From desire | passion | springs, | from desire | lust | is born, |

लोभान्मोहश्च नाशश्च लोभः पापस्य कारणं ॥ २६ ॥

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| lobhât | mohas | cha, | nâśas | cha; | lobhas | pâpasya | kâraṇam. | (26) |
| -bha, *Ab.sg.* | -ha, *N. sg.* | *Ind.* | -śa, *N. sg.* | *Ind.* | -bha, *N. sg.* | -pa, *G. sg. n.* | -ṇa, *N. sg.* | |
| from desire | infatuation | and, | destruction | and; | desire | of evil | the cause. | |

अन्यच्च । असंभवं हेममृगस्य जन्म तथापि रामो लुलुभे मृगाय ।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| anyad | cha, | a-sambhavam | hema-mṛigasya | janma, | tathâ. | api | râmas | lulubhe | mṛigâya; |
| -ya, *N. sg. n.* | *Ind.* | *Bahuv.* -va, *N. sg. n.* | *Ttp.* -ga, *G. sg.* | -man, *N. sg.* | *Ind.* | *Ind.* | -ma, *N. sg.* | lubh, 3 *sg. Perf. Âtm.* | -ga, *D. sg.* |
| Again | and, | Impossible | the gold-deer's | birth, | yet thus | even | Râma | had a desire | for the deer; |

प्रायः समापन्नविपत्तिकाले धियो ऽपि पुंसां मलिना भवंति ॥ २७ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| prâyas | samâpanna-vipatti-kâle | dhiyas | api | puṁsâm | malinâs | bhavanti. | (27) |
| *Ind.* | *Ttp.* -la, *L. sg.* (*rt.* pad *with* sam-â) | dhî, *N. pl.* | *Ind.* | puṁs, *G. pl.* | -na, *N. pl. f.* | bhû, 3 *pl. Pres. Par.* | |
| often | at the approached-misfortune's-time | the minds | even | of men | obscured | become. | |

अनंतरं सर्वे जालेन बद्धा बभूवुः । ततो यस्य वचनात्

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| an-antaram | sarve | jâlena | baddhâs | babhûvus. | tatas | yasya | vachanât |
| *Ind.* | -va, *N. pl. m.* | -la, *I. sg.* | bandh, *N. pl. m. past Ptc. Pass.* | bhû, 3 *pl. Perf. Par.* | *Ind.* | yad, *G. sg. m.* | -na, *Ab. sg.* |
| Immediately | all | by the net | caught | were. | Then | whose | through speech |

तत्रावलंबितास्तं सर्वे तिरस्कुर्वंति ।

| | | | | |
|---|---|---|---|---|
| tatra | ava-lambitâs | tam | sarve | tiras-kurvanti. |
| *Ind.* | lamb *with* ava, *N. pl. m. past. Ptc. Pass.* | tad, *Ac. sg. m.* | -va, *N. pl. m.* | kri *with* tiras, 3 *pl. Pres. Par.* |
| there | descended, | him | all | reproach. |

यतः । न गणस्याग्रतो गच्छेत्सिद्धे कार्ये समं फलं ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| yatas, | na | gaṇasya | agratas | gachchhet, | siddhe | kârye | samam | phalam, |
| *Ind.* | *Ind.* | -ṇa, *G. sg.* | *Ind.* | gam, 3 *sg. Pot. Par.* | sidh, *L. sg. n. past Ptc. Pass.* | -ya, *L. sg.* | -ma, *N. sg. n.* | -la, *N. sg.* |
| For, | not | of a mass | in front | one should go; | succeeding | the action, | equal | the fruit, |

यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते ॥ २८ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| yadi | kârya-vipattis | syât | mukharas | tatra | hanyate. | (28) |
| *Ind.* | *Ttp.* -tti, *N. sg.* | as, 3 *sg. Pot. Par.* | -ra, *N. sg. m.* | *Ind.* | han, 3 *sg. Pres. Pass.* | |
| if | action-failure | should be, | the leader | there | is slain. | |

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच । नायमस्य दोषः ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| tasya | tiras-kâram | śrutvâ | chitra-grîvas | uvâcha: | na | ayam | asya | doshas; |
| tad, *G. sg. m.* | -ra, *Ac. sg.* | śru, *Ger.* | *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* | *Ind.* | idam, *N. sg. m.* | idam, *G. sg. m.* | -sha, *N. sg.* |
| Of him | the reproach | having heard | Chitragrîva | said: | Not | this | of him | the fault; |

यतः । आपदामापतंतीनां हितो ऽप्यायाति हेतुतां ।

| | | | | | | |
|---|---|---|---|---|---|---|
| yatas, | â-padâm | â-patantînâm | hitas | api | â-yâti | hetutâm; |
| *Ind.* | -pad, *G. pl.* | pat *with* â, *G. pl. f. Ptc. Pres. Par.* | -ta, *N. sg. m.* | *Ind.* | yâ *with* â, 3 *sg. Pres. Par.* | -tâ, *Ac. sg.* |
| For, | Of misfortunes | arriving | a friend | even | goes-to | the state of being the cause; |

मातृजंघा हि वत्सस्य स्तंभीभवति बंधने ॥ २९ ॥

| | | | | | |
|---|---|---|---|---|---|
| mâtṛi-jaṅghâ | hi | vatsasya | stambhî-bhavati | bandhane. | (29) |
| *Ttp.* -ghâ, *N. sg.* | *Ind.* | -sa, *G. sg.* | stambhî-bhû, 3 *sg. Pres. Par.* | -na, *L. sg.* | |
| the mother's-leg | for | of a calf | post-becomes | in the fastening | |

अन्यच्च । स बंधुर्यो विपन्नानामापदुद्धरणक्षमः ।

| | | | | | | |
|---|---|---|---|---|---|---|
| anyad | cha, | sas | bandhus | yas | vi-pannânâm | âpad-uddharaṇa-kshamas, |
| -ya, *N. sg. n.* | *Ind.* | tad, *N. sg. m.* | -dhu, *N. sg.* | yad, *N. sg. m.* | pad *with* vi, *G. pl. m. past Ptc. Pass.* | *Ttp.* -ma, *N. sg. m.* |
| Again | and, | He | a friend | who | of the afflicted | out of misfortune-to lift-able, |

न तु भीतपरित्राणवस्तूपालंभपंडितः ॥ ३० ॥

| | | |
|---|---|---|
| na | tu | bhîta-paritrâṇa-vastu-upâlambha-paṇḍitas. (30) |
| *Ind.* | *Ind.* | *Ttp.* -ta, *N. sg. m.* |
| Not | but | the danger-deliverance-means-reproaching-clever. |

विपत्काले विस्मय एव कापुरुषलक्षणं । तदत्र धैर्यम-

| | | | | | | |
|---|---|---|---|---|---|---|
| vipad-kâle | vi-smayas | eva | kâpurusha-lakshaṇam. | tad | atra | dhairyam |
| *Ttp.* -la, *L. sg.* | -ya, *N. sg.* | *Ind.* | *Ttp.* -na, *N. sg.* | *Ind.* | *Ind.* | -ya, *Ac. sg.* |
| At misfortune-time | amazement | just | a weak-man's-mark. | Therefore | here | firmness |

वलंब्य प्रतीकारश्चिंत्यतां ।

| | | |
|---|---|---|
| ava-lambya | pratî-kâras | chintyatâm. |
| lamb *with* ava, *Ger.* | -ra, *N. sg.* | chint, 3 *sg. Imp. Pass.* |
| embracing | a-remedy | let be thought of. |

यतः । विपदि धैर्यमथाभ्युदये क्षमा

| | | | | | |
|---|---|---|---|---|---|
| yatas, | vi-padi | dhairyam, | atha | abhi-ud-aye | kshamâ, |
| *Ind.* | -pad, *L. sg.* | -ya, *N. sg.* | *Ind.* | -ya, *L. sg.* | -mâ, *N. sg.* |
| For, | In misfortune | firmness, | further | in prosperity | moderation, |

सदसि वाक्पटुता युधि विक्रमः ।

| | | | |
|---|---|---|---|
| sadasi | vâch-paṭutâ, | yudhi | vi-kramas, |
| -das, *L. sg.* | *Ttp.* -tâ, *N. sg.* | -dh, *L. sg.* | -ma, *N. sg.* |
| in an assembly | word-cleverness, | in battle | heroism, |

यशसि चाभिरुचिर्व्यसनं श्रुतौ

| | | | | |
|---|---|---|---|---|
| yaśasi | cha | abhi-ruchis, | vyasanam | śrutau, |
| -śas, *L. sg.* | *Ind.* | -chi, *N. sg.* | -na, *N. sg.* | -ti, *L. sg.* |
| in glory | and | contentment, | diligence | in sacred study, |

प्रकृतिसिद्धमिदं हि महात्मनां ॥ ३१ ॥

| | | | |
|---|---|---|---|
| prakṛiti-siddham | idam | hi | mahat-âtmanâm. (31) |
| *Ttp.* -dha, *N. sg. n.* (*rt.* sidh) | idam, *N. sg. n.* | *Ind.* | *Bahuv.* -man, *G. pl.* |
| by nature-accomplished | this | indeed | of the great-minded. |

संपदि यस्य न हर्षो विपदि विषादो रणे च धीरत्वं ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| sam-padi | yasya | na | harshas, | vi-padi | vi-sâdas, | raṇe | cha | dhîratvam, |
| -pad, *L. sg.* | yad, *G. sg. m.* | *Ind.* | -sha, *N. sg.* | -pad, *L. sg.* | -da, *N. sg.* | -ṇa, *L. sg.* | *Ind.* | -tva, *N. sg.* |
| In happiness | whose | not | exultation, | in misfortune | despair, | in battle | and | firmness, |

तं भुवनत्रयतिलकं जनयति जननी सुतं विरलं ॥ ३२ ॥

| | | | | | |
|---|---|---|---|---|---|
| tam | bhuvana-traya-tilakam | janayati | jananî | sutam | viralam. (32) |
| tad, *Ac. sg. m.* | *Ttp.* -ka, *Ac. sg.* | jan, 3 *sg. Pres. Par. Caus.* | -nî, *N. sg.* | -ta, *Ac. sg. m.* | -la, *Ac. sg. n. Adv.* |
| him | a world-triad-ornament | bears | a mother | a son | rarely. |

अन्यच्च । षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| anyad | cha, | shat | doshâs | purushena | iha | hâtavyâs | bhûtim | ichchhatâ, |
| -ya, *N. sg. n.* | *Ind.* | shash, *N.* | -sha, *N. pl.* | -sha, *I. sg.* | *Ind.* | hâ, *N. pl. m. Ptc. Fut. Pass.* | -ti, *Ac. sg.* | ish, *I. sg. m. Ptc. Pres. Par.* |
| Again | and, | Six | faults | by a man | here | to be avoided, | prosperity | wishing, |

निद्रा तंद्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ ३३ ॥

| | | | | | |
|---|---|---|---|---|---|
| nidrâ | tandrâ | bhayam | krodhas | âlasyam | dîrgha-sûtratâ. (33) |
| -râ, *N. sg.* | -râ, *N. sg.* | -ya, *N. sg.* | -dha, *N. sg.* | -ya, *N. sg.* | -tâ, *N. sg.* |
| Sleep, | sloth, | fear, | anger, | laziness, | procrastination. |

इदानीमप्येवं क्रियतां । सर्वैरेकचित्तीभूय जालमादायोड्डीयतां ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| idânîm | api | evam | kriyatâm; | sarvais | ekachittî-bhûya | jâlam | â-dâya | ud-dîyatâm. |
| *Ind.* | *Ind.* | *Ind.* | kri, 3 *sg. Imp. Pass.* | -va, *I. pl. m.* | ekachittî-bhû, *Ger.* | -la, *Ac. sg.* | dâ *with* â, *Ger.* | dî *with* ud, 3 *sg. Imp. Pass.* |
| At present | also | thus | may be acted; | by all | of one-mind-being, | the net | having taken, | up-may be flown. |

यतः । अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।

| | | | | | |
|---|---|---|---|---|---|
| yatas, | alpânâm | api | vastûnâm | sam-hatis | kârya-sâdhikâ, |
| *Ind.* | -pa, *G. pl. n.* | *Ind.* | -tu, *G. pl.* | -ti, *N. sg.* | *Ttp.* -dhaka, *N. sg. f.* |
| For, | Of small | even | things | a combination | aim-accomplishing, |

तृणैर्गुणत्वमापन्नैर्बध्यंते मत्तदंतिनः ॥ ३४ ॥

| | | | | |
|---|---|---|---|---|
| trinais | gunatvam | â-pannais | badhyante | matta-dantinas. (34) |
| -na, *I. pl. m.* or *n.* | -tva, *Ac. sg.* | pad *with* â, *I. pl. m.* or *n. past Ptc. Pass.* | bandh, 3 *pl. Pres. Pass.* | *Karm.* -tin, *N. pl.* (*rt.* mad). |
| with grass blades, | a rope's state | having attained, | are bound | furious-elephants. |

संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि ।

| | | | | | |
|---|---|---|---|---|---|
| sam-hatis | śreyasî | puṁsâm | sva-kulais | alpakais | api, |
| -ti, *N. sg.* | praśasya. *N. sg. f. Compar.* | puṁs, *G. pl.* | *Karm.* -la, *I. pl.* | -ka, *I. pl. n.* | *Ind.* |
| Combination | better | of men | with their-families | small | even, |

तुषेणापि परित्यक्ता न प्ररोहंति तंडुलाः ॥ ३५ ॥

| | | | | | |
|---|---|---|---|---|---|
| tushena | api | pari-tyaktâs | na | pra-rohanti | tandulâs. (35) |
| -sha, *I. sg.* | *Ind.* | tyaj *with* pari, *N. pl. m. past Ptc. Pass.* | *Ind.* | ruh *with* pra, 3 *pl. Pres. Par.* | -la, *N. pl.* |
| by the husk | merely | deserted | not | grow-up | rice-grains. |

इति विचिंत्य पक्षिणः सर्वे जालमादायोत्पतिताः ।

| | | | | | | |
|---|---|---|---|---|---|---|
| iti | vi-chintya | pakshinas | sarve | jâlam | â-dâya | ud-patitâs. |
| *Ind.* | chint *with* vi, *Ger.* | -shin, *N. pl. m.* | -va, *N. pl. m.* | -la, *Ac. sg.* | dâ *with* â, *Ger.* | pat *with* ud, *N. pl. m. past Ptc. Pass.* |
| Thus | having considered, | the birds | all | the net | having taken, | flown-up. |

अनंतरं स व्याधः सुदूराज्जालापहारकांस्तानवलोक्य

| | | | | | | |
|---|---|---|---|---|---|---|
| an-antaram | sas | vyâdhas | su-dûrât | jâla-apahârakân | tân | ava-lokya |
| *Ind.* | tad, *N. sg. m.* | -dha, *N. sg.* | *Ind.* | *Ttp.* -ka, *Ac. pl. m.* | tad, *Ac. pl. m.* | lok *with* ava, *Ger.* |
| Thereupon | that | hunter | from very-far | net-carrying off | them | having seen, |

पश्चाद्धावन्नचिंतयत् ।

| | | |
|---|---|---|
| paśchât | dhâvan | achintayat: |
| *Ind.* | dhâv, *N. sg. m. Ptc. Pres. Par.* | chint, 3 *sg. Impf. Par.* |
| after | running, | thought: |

संहतास्तु हरंत्येते मम जालं विहंगमाः ।

| | | | | | | |
|---|---|---|---|---|---|---|
| sam-hatâs | tu | haranti | ete | mama | jâlam | viham-gamâs, |
| han *with* sam, *N. pl. m. past Ptc. Pass.* | *Ind.* | hṛi, 3 *pl. Pres. Par.* | etad, *N. pl. m.* | asmad, *G. sg.* | -la, *Ac. sg.* | -ma, *N. pl.* |
| Combined | indeed | take away | these | of me | the net | the birds, |

यदा तु निपतिष्यंति वशमेष्यंति मे तदा ॥ ३६ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| yadâ | tu | ni-patishyanti | vaśam | eshyanti | me | tadâ. | (36) |
| *Ind.* | *Ind.* | pat *with* ni, 3 *pl. Fut.* ii. *Par.* | -śa, *Ac. sg.* | i, 3 *pl. Fut.* ii. *Par.* | asmad, *G. sg.* | *Ind.* | |
| if | but | down-they shall fall, | into the power | they will go | of me | then. | |

ततस्तेषु चक्षुर्विषयातिक्रांतेषु पक्षिषु स व्याधो

| | | | | | |
|---|---|---|---|---|---|
| tatas | teshu | chakshus-vishaya-atikrânteshu | pakshishu | sas | vyâdhas |
| *Ind.* | tad, *L. pl. m.* | *Ttp.* -ta, *L. pl. m.* (*rt.* kram *with* ati) | -shin, *L. pl. m.* | tad, *N. sg. m.* | -dha, *N. sg.* |
| Then | those | the sight-confines-having passed | birds, | that | hunter |

निवृत्तः । अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता

| | | | | | |
|---|---|---|---|---|---|
| ni-vṛittas. | atha | lubdhakam | ni-vṛittam | dṛishṭvâ | kapotâs |
| vṛit *with* ni, *N. sg. m. past Ptc. Pass.* | *Ind.* | -ka, *Ac. sg.* | vṛit *with* ni, *Ac. sg. m. past Ptc. Pass.* | dṛiś, *Ger.* | -ta, *N. pl.* |
| returned. | Now | the hunter | returned | having seen | the pigeons |

ऊचुः । किमिदानीं कर्तुमुचितं । चित्रग्रीव उवाच ।

| | | | | | | |
|---|---|---|---|---|---|---|
| ûchus: | kim | idânîm | kartum | uchitam? | chitra-grîvas | uvâcha: |
| vach, 3 *pl. Perf. Par.* | kim, *Ac. sg. n.* | *Ind.* | kṛi, *Inf.* | -ta, *N. sg. n.* | *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* |
| said: | What | now | to do | proper? | Chitragrîva | said: |

माता मित्रं पिता चेति स्वभावात्त्रितयं हितं ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| mâtâ | mitram | pitâ | cha | iti | sva-bhâvât | tritayam | hitam; |
| -tṛi, *N. sg.* | -ra, *N. sg.* | -tṛi, *N. sg.* | *Ind.* | *Ind.* | *Karm.* -va, *Ab. sg.* | -ya, *N. sg.* | -ta, *N. sg. n.* |
| A mother, | a friend, | a father | and, | thus | from inborn-disposition | a triad | friendly; |

कार्यकारणतश्चान्ये भवंति हितबुद्धयः ॥ ३७ ॥

| | | | | | |
|---|---|---|---|---|---|
| kârya-kâraṇa-tas | cha | anye | bhavanti | hita-buddhayas. | (37) |
| *Dvandva. with* tas. | *Ind.* | -ya, *N. pl. m.* | bhû, 3 *pl. Pres. Par.* | *Bahuv.* -dhi, *N. pl. m.* | |
| from effect-and-cause | and | others | become | friendly-minded. | |

तदस्माकं मित्रं हिरण्यको नाम मूषिकराजो गंडकीतीरे

| | | | | | | |
|---|---|---|---|---|---|---|
| tad | asmâkam | mitram | hiraṇyakas | nâma | mûshika-râjas | gaṇḍakî-tîre |
| *Ind.* | asmad, *G. pl.* | -ra, *N. sg.* | -ka, *N. sg.* | -man, *Ac. sg. Adv.* | *Ttp.* -ja, *N. sg.* | *Ttp.* -ra, *L. sg.* |
| Now | of us | a friend | Hiraṇyaka | by name, | a mouse-king, | on the Gaṇḍakî-bank |

चित्रवने निवसति । सो ऽस्माकं पाशांश्छेत्स्यति ।

| | | | | | |
|---|---|---|---|---|---|
| chitra-vane | ni-vasati; | sas | asmâkam | pâśân | chhetsyati. |
| *Karm.* -na, *L. sg.* | vas *with* ni, 3 *sg. Pres. Par.* | tad, *N. sg. m.* | asmad, *G. pl.* | -śa, *Ac. pl.* | chhid, 3 *sg. Fut.* ii. *Par.* |
| in the Chitra-wood | dwells; | he | of us | the fetters | will cut. |

इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः । हिरण्यकश्च

| | | | | | | |
|---|---|---|---|---|---|---|
| iti | â-lochya | sarve | hiraṇyaka-vivara-samîpam | gatâs. | hiraṇyakas | cha |
| *Ind.* | loch *with* â, *Ger.* | -va, *N. pl. m.* | *Ttp.* -pa, *Ac. sg. Adv.* | gam, *N. pl. m. past Ptc. Pass.* | -ka, *N. sg.* | *Ind.* |
| Thus | having reflected | all | Hiraṇyaka's-hole-near | gone. | Hiraṇyaka | and |

सर्वदापायशंकया शतद्वारं विवरं कृत्वा निवसति ।

| | | | | | |
|---|---|---|---|---|---|
| sarvadâ | apâya-śankayâ | śata-dvâram | vi-varam | kritvâ | ni-vasati. |
| *Ind.* | *Ttp.* -kâ, *I. sg.* | *Bahuv.* -ra, *Ac. sg. n.* | -ra, *Ac. sg.* | kri, *Ger.* | vas *with* ni, 3 *sg. Pres. Par.* |
| always | through danger-dread | a hundred-doored | hole | having made | dwells. ✗ |

ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः ।

| | | | | | |
|---|---|---|---|---|---|
| tatas | hiraṇyakas | kapota-avapâta-bhayât | chakitas | tûshṇîm | sthitas. |
| *Ind.* | -ka, *N. sg.* | *Ttp.* -ya, *Ab. sg.* | -ta, *N. sg. m.* | *Ind.* | sthâ, *N. sg. m. past Ptc. Pass.* |
| Then | Hiraṇyaka | from the pigeon-descent-fear | timid | silently | stood. |

चित्रग्रीव उवाच । सखे हिरण्यक किमस्मान्न संभाषसे ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| chitra-grîvas | uvâcha: | sakhe | hiraṇyaka, | kim | asmân | na | sam-bhâshase? |
| *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* | -khi, *V. sg.* | -ka, *V. sg.* | *Ind.* | asmad, *Ac. pl.* | *Ind.* | bhâsh *with* sam, 2 *sg. Pres. Âtm.* |
| Chitragrîva | said: | Friend | Hiraṇyaka, | why | us | not | dost thou greet? |

ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससंभ्रमं

| | | | | |
|---|---|---|---|---|
| tatas | hiraṇyakas | tad-vachanam | prati-abhi-jñâya | sa-sambhramam |
| *Ind.* | -ka, *N. sg.* | *Ttp.* -na, *Ac. sg.* | jñâ *with* prati-abhi, *Ger.* | *Avyay.* |
| Then | Hiraṇyaka | of him-the voice | having recognised | hastily |

बहिर्निःसृत्याब्रवीत् । आः पुण्यवानस्मि प्रियसुहृन्मे

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| vahis | nis-sṛitya | abravît: | âḥ | puṇyavân | asmi, | priya-suhṛid | me |
| *Ind.* | sri *with* nis, *Ger.* | brû, 3 *sg. Impf. Par.* | *Ind.* | -vat, *N. sg. m.* | as, 1 *sg. Pres. Par.* | *Karm.* -d, *N. sg.* | asmad, *G. sg.* |
| out | slipping | said: | Oh, | happy | I am, | the dear-friend | of me |

चित्रग्रीवः समायातः ।

| | |
|---|---|
| chitra-grîvas | sam-â-yâtas. |
| *Bahuv.* -va, *N. sg.* | yâ *with* sam *and* â, *N. sg. m. past Ptc. Pass.* |
| Chitragrîva | arrived. |

यस्य मित्रेण संभाषा यस्य मित्रेण संस्थितिः ।

| | | | | | |
|---|---|---|---|---|---|
| yasya | mitreṇa | sam-bhâshâ | yasya | mitreṇa | sam-sthitis |
| yad, *G. sg. m.* | -ra, *I. sg.* | -shâ, *N. sg.* | yad, *G. sg. m.* | -ra, *I. sg.* | -ti, *N. sg.* |
| Whose | with a friend | greeting, | whose | with a friend | staying, |

यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान् ॥ ३८ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| yasya | mitreṇa | sam-lâpas | tatas | na | asti | iha | puṇyavân. (38) |
| yad, *G. sg. m.* | -ra, *I. sg.* | -pa, *N. sg.* | tad *with Abl. aff.* tas. | *Ind.* | as, 3 *sg. Pres. Par.* | *Ind.* | -vat, *N. sg. m.* |
| whose | with a friend | chatting, | than he | not | is there | here | a happier one. |

पाशबद्धांश्चैतान्दृष्ट्वा सविस्मयः क्षणं

| | | | | | |
|---|---|---|---|---|---|
| pâśa-baddhân | cha | etân | dṛishṭvâ | sa-vismayas | kshaṇam |
| *Ttp.* -dha, *Ac. pl. m.* (*rt.* bandh). | *Ind.* | etad, *Ac. pl. m.* | dṛiś, *Ger.* | *Bahuv.* -ya, *N. sg. m.* | -ṇa, *Ac. sg. Adv.* |
| Net-confined | and | them | having seen | with-amazement | a moment |

स्थित्वोवाच । सखे किमेतत् । चित्रग्रीवोऽवदत् ।

| | | | | | | |
|---|---|---|---|---|---|---|
| sthitvâ | uvâcha: | sakhe | kim | etad? | chitra-grîvas | avadat: |
| sthâ, *Ger.* | vach, 3 *sg. Perf. Par.* | -khi, *V. sg.* | kim, *N. sg. n.* | etad, *N. sg. n.* | *Bahuv.* -va, *N. sg.* | vad, 3 *sg. Impf. Par.* |
| having stood | he said: | Friend, | what | this? | Chitragrîva | said: |

+ Mr Johnson. - one reads after "dwells" "an old mole learned in politics. sees danger not yet arrived: dwelt there

सखे ऽस्माकं प्राक्तनजन्मकर्मणः फलमेतत् ।

| | | | | |
|---|---|---|---|---|
| sakhe | asmâkam | prâktana-janman-karmaṇas | phalam | etad. |
| -khi, *V. sg.* | asmad, *G. pl.* | *Ttp.* -man, *G. sg.* | -la, *N. sg.* | etad, *N. sg. n.* |
| Friend, | of us | of a former-birth's-action | the fruit | this. |

यस्माच्च येन च यथा च यदा च यच्च

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| yasmât | cha | yena | cha | yathâ | cha | yadâ | cha | yad | cha |
| yad, *Ab. sg. n.* | *Ind.* | yad, *I. sg. n.* | *Ind.* | *Ind.* | *Ind.* | *Ind.* | *Ind.* | yad, *N. sg. n.* | *Ind.* |
| Wherefore | and, | by what | and, | how | and, | when | and, | as what | and, |

यावच्च यत्र च शुभाशुभमात्मकर्म ।

| | | | | | |
|---|---|---|---|---|---|
| yâvat | cha | yatra | cha | śubha-aśubham | âtman-karma, |
| -vat, *N. sg. n.* | *Ind.* | *Ind.* | *Ind.* | *Dvandva.* -bha, *N. sg. n.* | *Ttp.* -man, *N. sg.* |
| how great | and, | where | and, | good-(and) evil | one's own-action, |

तस्माच्च तेन च तथा च तदा च तच्च

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| tasmât | cha | tena | cha | tathâ | cha | tadâ | cha | tad | cha |
| tad, *Ab. sg. n.* | *Ind.* | tad, *I. sg. n.* | *Ind.* | *Ind.* | *Ind.* | *Ind.* | *Ind.* | tad, *N. sg. n.* | *Ind.* |
| therefore | and, | by that | and, | thus | and, | then | and, | as that | and, |

तावच्च तत्र च विधातृवशादुपैति ॥ ३९ ॥

| | | | | | |
|---|---|---|---|---|---|
| tâvat | cha | tatra | cha | vidhâtṛi-vaśât | upa-eti (39) |
| -vat, *N. sg. n.* | *Ind.* | *Ind.* | *Ind.* | *Ttp.* -śa, *Ab. sg.* | i *with* upa, 3 *sg. Pres. Par.* |
| so great | and, | there | and, | through fate's-power | it approaches. |

रोगशोकपरीतापबंधनव्यसनानि च ।

| | |
|---|---|
| roga-śoka-parîtâpa-bandhana-vyasanâni | cha |
| *Dvandva.* -na, *N. pl.* | *Ind.* |
| Sickness-sorrow-pain-bonds-affliction | and, |

आत्मापराधवृक्षस्य फलान्येतानि देहिनां ॥ ४० ॥

| | | | |
|---|---|---|---|
| âtman-aparâdha-vṛikshasya | phalâni | etâni | dehinâm. (40) |
| *Ttp.* -sha, *G. sg.* | -la, *N. pl.* | etad. *N. pl. n.* | -hin, *G. pl. m.* |
| of the self-transgressions'-tree | the fruits | these | of creatures. |

एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बंधनं छेत्तुं

| | | | | | |
|---|---|---|---|---|---|
| etad | śrutvâ | hiraṇyakas | chitra-grîvasya | bandhanam | chhettum |
| etad, *Ac. sg. n.* | śru, *Ger.* | -ka, *N. sg.* | *Bahuv.* -va, *G. sg.* | -na, *Ac. sg.* | chhid, *Inf.* |
| This | having heard | Hiraṇyaka | Chitragrîva's | bonds | to cut |

सत्वरमुपसर्पति । चित्रग्रीव उवाच । मित्र मा मैवं ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| sa-tvaram | upa-sarpati. | chitra-grîvas | uvâcha: | mitra | mâ | mâ | evam; |
| *Avyay.* | sṛip, *with* upa, 3 *sg. Pres. Par.* | *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* | -ra, *V. sg.* | *Ind.* | *Ind.* | *Ind.* |
| with-haste | advances. | Chitragrîva | said: | Friend, | not, | not | thus; |

अस्मदाश्रितानामेषां तावत्पाशांश्छिंधि तदा मम

| | | | | | | |
|---|---|---|---|---|---|---|
| asmad-âśritânâm | eshâm | tâvat | pâśân | chhindhi, | tadâ | mama |
| *Ttp.* -ta, *G. pl. m.* (*rt.* śri, *with* â) | etad, *G. pl. m.* | *Ind.* | -śa, *Ac. pl.* | chhid, 2 *sg. Imp. Par.* | *Ind.* | asmad, *G. sg.* |
| of my-dependants | of these, | first | the fetters | cut, | then | of me |

पाशं पश्चाच्छेत्स्यसि। हिरण्यको ऽप्याह। अहमल्पशक्ति-

| pâsam | paschât | chhetsyasi. | hiranyakas | api | âha: | aham | alpa-saktis, |
|---|---|---|---|---|---|---|---|
| -sa, *Ac. sg.* | *Ind.* | chhid, 2 *sg. Fut.* ii. *Par.* | -ka. *N. sg.* | *Ind.* | ah, 3 *sg. Perf. Par.* | asmad, *N. sg.* | *Bahuv.* -ti, *N. sg. m.* |
| the fetter | afterwards | thou wilt cut. | Hiranyaka | also | said : | I | of little-strength, |

र्दंताश्च मे कोमलास्तदेतेषां पाशांश्छेत्तुं

| dantâs | cha | me | komalâs, | tad | eteshâm | pâsân | chhettum |
|---|---|---|---|---|---|---|---|
| -ta. *N. pl.* | *Ind.* | asmad, *G. sg.* | -la, *N. pl. m.* | *Ind.* | etad, *G. pl. m.* | -sa, *Ac. pl.* | chhid, *Inf.* |
| the teeth | and | of me | delicate, | therefore | of these | the fetters | to cut |

कथं समर्थः। तद्यावन्मे दंता न त्रुट्यंति

| katham | samarthas ? | tad | yâvat | me | dantâs | na | trutyanti, |
|---|---|---|---|---|---|---|---|
| *Ind.* | -tha, *N. sg. m.* | *Ind.* | *Ind.* | asmad, *G. sg.* | -ta, *N. pl.* | *Ind.* | trut, 3 *pl. Pres. Par.* |
| how | able ? | Therefore | as long as | of me | the teeth | not | break, |

तावत्तव पाशं छिनद्मि तदनंतरमेषामपि

| tâvat | tava | pâsam | chhinadmi ; | tad-anantaram | eshâm | api |
|---|---|---|---|---|---|---|
| *Ind.* | yushmad, *G. sg.* | -sa, *Ac sg.* | chhid, 1 *sg. Pres. Par.* | *Ind.* | etad, *G. pl. m.* | *Ind.* |
| so long | of thee | the fetter | I cut ; | thereafter | of these | also |

बंधनं यावच्छक्यं छेत्स्यामि। चित्रग्रीव उवाच।

| bandhanam | yâvat-sakyam | chhetsyâmi. | chitra-grîvas | uvâcha : |
|---|---|---|---|---|
| -na, *Ac. sg.* | *Avyay.* | chhid, 1 *sg. Fut.* ii. *Par.* | *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* |
| the bonds | as far as-possible | I shall cut. | Chitragrîva | said : |

अस्त्वेवं तथापि यथाशक्त्येतेषां बंधनं

| astu | evam, | tathâ | api | yathâ-sakti | eteshâm | bandhanam |
|---|---|---|---|---|---|---|
| as, 3 *sg. Imp. Par.* | *Ind.* | *Ind.* | *Ind.* | *Avyay.* | etad, *G. pl. m.* | -na, *Ac. sg.* |
| Be it | so, | thus | even | according to-strength | of these | the bonds |

खंडय। हिरण्यकेनोक्तं। आत्मपरित्यागेन यदा-

| khandaya. | hiranyakena | uktam : | âtman-parityâgena | yad |
|---|---|---|---|---|
| khand, 2 *sg. Imp. Par.* | -ka, *I. sg.* | vach, *N. sg. n. past Ptc. Pass.* | *Ttp.* -ga, *I. sg.* | yad, *N. sg. n.* |
| divide. | By Hiranyaka | said : | by self-sacrifice | what |

श्रितानां परिरक्षणं तन्न नीतिवेदिनां संमतं।

| â-sritânâm | pari-rakshanam | tad | na | nîti-vedinâm | sam-matam. |
|---|---|---|---|---|---|
| sri *with* â, *G. pl. m. past Ptc. Pass.* | -na, *N. sg.* | tad, *N. sg. n.* | *Ind.* | *Ttp.* -din, *G. pl. m.* | man *with* sam, *N. sg. n. past Ptc. Pass.* |
| of dependants | preservation, | that | not | of the policy-knowing | approved of. |

यतः। आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि।

| yatas, | âpad-arthe | dhanam | rakshet, | dârân | rakshet | dhanais | api, |
|---|---|---|---|---|---|---|---|
| *Ind.* | *Ttp.* -tha, *L. sg. Adv.* | -na, *Ac. sg.* | raksh, 3 *sg. Pot. Par.* | -ra, *Ac. pl.* | raksh, 3 *sg. Pot. Par.* | -na, *I. pl.* | *Ind.* |
| For, | For misfortune's-sake | riches | one should save, | the wife | one should save | through the riches | even, |

आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥ ४१॥

| âtmânam | satatam | rakshet | dârais | api | dhanais | api. (41) |
|---|---|---|---|---|---|---|
| -man, *Ac. sg.* | *Ac. sg. n. Adv.* | raksh, 3 *sg. Pot. Par.* | -ra, *I. pl.* | *Ind.* | -na, *I. pl.* | *Ind.* |
| oneself | constantly | one should save | through the wife | even, | through the riches | even. |

अन्यच्च। धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः।

| | | | | |
|---|---|---|---|---|
| anyad | cha, | dharma-artha-kâma-mokshânâm | prânâs | saṁsthiti-hetavas, |
| -ya, *N. sg. n.* | *Ind.* | *Dvandva.* -sha, *G. pl.* | -ṇa, *N. pl.* | *Ttp.* -tu, *N. pl.* |
| Again | and, | Of virtue-wealth-desire-final liberation | life | the existence-cause, |

तान्निघ्नता किं न हतं रक्षता किं न रक्षितं ॥ ४२ ॥

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| tân | ni-ghnatâ | kim | na | hatam, | rakshatâ | kim | na | rakshitam ? (42) |
| tad, *Ac. pl. m.* | han *with* ni, *I. sg. m. Pres. Ptc. Par.* | kim, *N. sg. n.* | *Ind.* | han, *N. sg. n. past Ptc. Pass.* | raksh, *I. sg. m. Pres. Ptc. Par.* | *id.* | *Ind.* | raksh, *past Ptc. Pass.* |
| that | by one destroying | what | not | destroyed, | by one saving | what | not | saved ? |

चित्रग्रीव उवाच। सखे नीतिस्तावदीदृश्येव किंतु-

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| chitra-grîvas | uvâcha : | sakhe | nîtis | tâvat | îdṛiśî | eva, | kim-tu |
| *Bahuv.* -va, *N. sg.* | vach, 3 *sg. Perf. Par.* | -khi, *V. sg.* | -ti, *N. sg.* | *Ind.* | -ś, *N. sg. f.* | *Ind.* | *Ind: Ind.* |
| Chitragrîva | said : | Friend, | policy | certainly | such | just, | but |

अहमस्मदाश्रितानां दुःखं सोढुं सर्वथासमर्थः।

| | | | | | |
|---|---|---|---|---|---|
| aham | asmad-âśritânâm | duḥkham | soḍhum | sarvathâ | a-samarthas ; |
| asmad, *N. sg.* | *Ttp.* -ta, *G. pl. m.* (*rt.* śri *with* â) | -kha, *Ac. sg.* | sah, *Inf.* | *Ind.* | *Karm.* -tha, *N. sg. m.* |
| I | of my-dependants | the affliction | to bear | wholly | un-able ; |

तेनेदं ब्रवीमि।

| | | |
|---|---|---|
| tena | idam | bravîmi. |
| tad, *I. sg. n. Adv.* | idam, *Ac. sg. n.* | brû, 1 *sg. Pres. Par.* |
| therefore | this | I say. |

यतः। धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| yatas | dhanâni | jîvitam | cha | eva | para-arthe | prâjñas | ud-sṛijet ; |
| *Ind.* | -na, *Ac. pl.* | -ta, *Ac. sg.* | *Ind.* | *Ind.* | *Ttp.* -tha, *L. sg. Adv.* | -ña, *N. sg. m.* | sṛij, *with* ud, 3 *sg. Pot. Par.* |
| For, | Riches, | life | and | even, | for another's-sake | the wise | should give-up ; |

सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ ४३ ॥

| | | | | | |
|---|---|---|---|---|---|
| sat-nimitte | varam | tyâgas, | vi-nâśe | ni-yate | sati. (43) |
| *Ttp.* -tta, *L. sg.* | -ra, *N. sg. Adv.* | -ga, *N. sg.* | -śa, *L. sg.* | yam *with* ni, *L. sg. m. past Ptc. Pass.* | as, *L. sg. m. Ptc. Pres. Par.* |
| for good's sake | preferable | the sacrifice, | destruction | destined | being. |

अयमपरश्चासाधारणो हेतुः।

| | | | | |
|---|---|---|---|---|
| ayam | aparas | cha | a-sâdhâraṇas | hetus : |
| idam, *N. sg. m.* | -ra, *N. sg. m.* | *Ind.* | *Bahuv.* -ṇa, *N. sg. m.* | -tu, *N. sg.* |
| This | another | and | un-paralleled | argument : |

जातिद्रव्यगुणानां च साम्यमेषां मया सह।

| | | | | | |
|---|---|---|---|---|---|
| jâti-dravya-guṇânâm | cha | sâmyam | eshâm | mayâ | saha, |
| *Dvandva.* -ṇa, *G. pl.* | *Ind.* | -ya, *N. sg. n.* | etad, *G. pl. m.* | asmad, *I. sg.* | *Ind.* |
| of kind-substance-quality | and | equality | of these | me | with, |

मत्प्रभुत्वफलं ब्रूहि कदा किं तद्भविष्यति ॥ ४४ ॥

| | | | | | |
|---|---|---|---|---|---|
| mad-prabhutva-phalam | brûhi | kadâ | kim | tad | bhavishyati ? (44) |
| *Ttp.* -la, *Ac. sg.* (*cf.* asmad) | brû, 2 *sg. Imp. Par.* | *Ind.* | kim, *N. sg. n.* | tad, *N. sg. n.* | bhû, 3 *sg. Fut.* ii. *Par.* |
| of me-the superiority-fruit, | say, | when | what | that | will be ? |

अन्यच्च । विना वर्तनमेवैते न त्यजंति ममांतिकं ।

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| anyad | cha, | vinâ | vartanam | eva | ete | na | tyajanti | mama | antikam, |
| -ya, N. sg. n. | Ind. | Ind. | -na, Ac. sg. | Ind. | etad, N. pl. m. | Ind. | tyaj, 3, pl. Pres. Par. | asmad, G. sg. | -ka, Ac. sg. |
| Again | and, | Without | wages | even, | these | not | abandon | of me | the proximity, |

तन्मे प्राणव्ययेनापि जीवयैतान्ममाश्रितान् ॥ ४५ ॥

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| tad | me | prâṇa-vyayena | api | jîvaya | etân | mama | â-śritân. | (45) |
| Ind. | asmad, G. sg. | Ttp. -ya, I. sg. | Ind. | jîv, 2 sg. Imp. Par. Caus. | etad, Ac. pl. m. | asmad, G. sg. | śri with â, Ac. pl. m. past Ptc. Pass. | |
| therefore | of me | with the life-loss | even | cause to live | these | of me | the dependants. | |

किंच । मांसमूत्रपुरीषास्थिनिर्मिते ऽस्मिन्कलेवरे ।

| | | | |
|---|---|---|---|
| kim-cha, | mâṁsa-mûtra-purîsha-asthi-nirmite | asmin | kalevare |
| Ind. Ind. | Ttp. -ta, L. sg. n. (rt. mâ with nis) | idam, L. sg. n. | -ra, L. sg. |
| Moreover, | On the flesh-urine-excrement-bone-composed | this | body |

विनश्वरे विहायास्थां यशः पालय मित्र मे ॥ ४६ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| vi-naśvare | vi-hâya | â-sthâm | yaśas | pâlaya | mitra | me. (46) |
| -ra, L. sg. n. | hâ with vi, Ger. | -sthâ, Ac. sg. | -śas, Ac. sg. | pâ, 2 sg. Imp. Par. Caus. | -ra, V. sg. | asmad, G. sg. |
| the perishable | having given up | consideration, | the fame | preserve, | O friend, | of me. |

अपरं च पश्य । यदि नित्यमनित्येन निर्मलं मलवाहिना ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| aparam | cha | paśya, | yadi | nityam | a-nityena | nis-malam | mala-vâhinâ |
| -ra, Ac. sg. n. | Ind. | dṛiś, 2 sg. Imp. Par. | Ind. | -ya, N. sg. n. | Karm. -ya, I. sg. n. | Bahuv. -la, N. sg. n. | Ttp. -hin, I. sg. n. |
| Another | and | behold, | If | the eternal | through the non-eternal, | the stain-less | through the stain-bringing, |

यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किं ॥ ४७ ॥

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| yaśas | kâyena | labhyeta, | tad | na | labdham | bhavet | nu | kim? | (47) |
| -śas, N. sg. | -ya, I. sg. | labh, 3 sg. Pot. Pass. | tad, N. sg. n. | Ind. | labh, N. sg. n. past Ptc. Pass. | bhû, 3 sg. Pot. Par. | Ind. | Ind. | |
| fame | through the body | might be obtained, | that | not | obtained | should be | well | why? | |

यतः । शरीरस्य गुणानां च दूरमत्यंतमंतरं ।

| | | | | | | |
|---|---|---|---|---|---|---|
| yatas, | śarîrasya | guṇânâm | cha | dûram | ati-antam | antaram, |
| Ind. | -ra, G. sg. | -ṇa, G. pl. | Ind. | -ra, N. sg. n. | Ttp. -ta, N. sg. n. | -ra, N. sg. n. |
| For, | Of the body | of virtues | and, | a wide | exceeding | difference, |

शरीरं क्षणविध्वंसि कल्पांतस्थायिनो गुणाः ॥ ४८ ॥

| | | | | |
|---|---|---|---|---|
| śarîram | kshaṇa-vidhvaṁsi, | kalpa-anta-sthâyinas | guṇâs. | (48) |
| -ra, N. sg. | Ttp. -sin, N. sg. n. | Ttp. -yin. N. pl. m. | -ṇa, N. pl. | |
| the body | in a moment-falling asunder, | to a kalpa's-end-lasting | virtues. | |

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्नब्रवीत् ।

| | | | | | | |
|---|---|---|---|---|---|---|
| iti | â-karṇya | hiraṇyakas | prahṛishṭa-manâs | pulakitas | san | abravît: |
| Ind. | karṇ with â, Ger. | -ka, N. sg. | Bahuv. -nas, N. sg. m. | -ta, N. sg. m. | as, N. sg. m. Ptc. Pres. Par. | brû, 3 sg. Impf. Par. |
| Thus | having heard | Hiraṇyaka | of delighted-mind | thrilled | being | said: |

साधु मित्र साधु । अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि

| | | | | | | |
|---|---|---|---|---|---|---|
| sâdhu, | mitra, | sâdhu; | anena | âśrita-vâtsalyena | trailokyasya | api |
| -dhu, N. sg. n. Adv. | -ra, V. sg. | -dhu, N. sg. n. Adv. | idam, I. sg. n. | Ttp. -ya, I. sg. | -ya, G. sg. | Ind. |
| Nobly, | friend, | nobly; | through this | towards the dependants-tenderness | of the three worlds | even |

प्रभुत्वं त्वयि युज्यते। एवमुक्त्वा तेन सर्वेषां

| | | | | | | |
|---|---|---|---|---|---|---|
| prabhutvam | tvayi | yujyate. | evam | uktvâ | tena | sarveshâm |
| -tva, *N. sg.* | yashmad, *L.sg.* | yuj, 3 *sg. Pres. Pass.* | *Ind.* | vach, *Ger.* | tad, *I. sg. m.* | -va. *G. pl. m.* |
| the sovereignty | in thee | is proper. | Thus | having spoken | by him | of all |

बंधनानि च्छिन्नानि। ततो हिरण्यकः सर्वान्सादरं संपूज्याह।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| bandhanâni | chhinnâni. | tatas | hiraṇyakas | sarvân | sa-âdaram | sam-pûjya | âha: |
| -na, *N. pl.* | chhid, *N. pl. n. past Ptc. Pass.* | *Ind.* | -ka, *N. sg.* | -va, *Ac. pl. m.* | *Avyay.* | pûj *with* sam, *Ger.* | ah, 3. *sg. Perf. Par.* |
| the bonds | cut. | Then | Hiraṇyaka | all | respectfully | having saluted | said: |

सखे चित्रग्रीव सर्वथात्र जालबंधनविधौ सति दोषमा-

| | | | | | | |
|---|---|---|---|---|---|---|
| sakhe | chitra-grîva, | sarvathâ | atra | jâla-bandhana-vidhau | sati | dosham |
| -khi, *V. sg.* | *Bahuv.* -va, *V. sg.* | *Ind.* | *Ind.* | *Ttp.* -dhi, *L. sg.* | as, *L. sg. m. Ptc. Pres. Par.* | -sha, *Ac. sg.* |
| Friend | Chitragrîva, | wholly | here | the net-confinement-destiny | being, | a fault |

शंक्यात्मन्यवज्ञा न कर्तव्या।

| | | | | |
|---|---|---|---|---|
| â-śaṅkya | âtmani | ava-jñâ | na | kartavyâ. |
| śaṅk *with* â, *Ger.* | -man, *L. sg.* | -jñâ, *N. sg.* | *Ind.* | kṛi, *N. sg. f. Ptc. Fut. Pass.* |
| suspecting, | of one's self | disdain | not | to be made. |

यतः। यो ऽधिकाद्योजनशतात्पश्यतीहामिषं खगः।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| yatas, | yas | adhikât | yojana-śatât | paśyati | iha | âmisham | kha-gas |
| *Ind.* | yad, *N. sg. m.* | -ka, *Ab. sg. n.* | *Ttp.* -ta, *Ab. sg.* | driś, 3 *sg. Pres. Par.* | *Ind.* | -sha, *Ac. sg.* | *Ttp.* -ga, *N. sg.* |
| For, | Who | from a great | yojana-hundred | espies | here | the prey, | a bird, |

स एव प्राप्तकालस्तु पाशबंधं न पश्यति ॥४९॥

| | | | | | | |
|---|---|---|---|---|---|---|
| sas | eva | prâpta-kâlas | tu | pâśa-bandham | na | paśyati. (49) |
| tad, *N. sg. m.* | *Ind.* | *Bahuv.* -la, *N. sg. m.* | *Ind.* | *Ttp.* -dha, *Ac. sg.* | *Ind.* | driś, 3 *sg. Pres. Par.* |
| he | even | having reached-the time | on the other hand | the snare-knot | not | sees. |

अपरं च। शशिदिवाकरयोर्ग्रहपीडनं

| | | | |
|---|---|---|---|
| aparam | cha, | śaśin-divâkarayos | graha-pîḍanam, |
| -ra, *N. sg. n.* | *Ind.* | *Dvandva.* -ra, *G. du.* | *Ttp.* -na, *Ac. sg.* |
| Another | and, | Of moon-(and)-sun | through eclipse-the distress, |

गजभुजंगमयोरपि बंधनं।

| | | |
|---|---|---|
| gaja-bhujaṅgamayos | api | bandhanam, |
| *Dvandva.* -ma, *G. du.* | *Ind.* | -na, *Ac. sg.* |
| of elephant-(and)-serpent | also | the binding, |

मतिमतां च विलोक्य दरिद्रतां

| | | | |
|---|---|---|---|
| matimatâm | cha | vi-lokya | daridratâm, |
| -mat, *G. pl. m.* | *Ind.* | lok *with* vi, *Ger.* | -tâ, *Ac. sg.* |
| of the wise | and | having perceived | the indigence, |

विधिरहो बलवानिति मे मतिः ॥५०॥

| | | | | | |
|---|---|---|---|---|---|
| vidhis | aho | balavân | iti | me | matis. (50) |
| -dhi, *N. sg.* | *Ind.* | -vat, *N. sg. m.* | *Ind.* | asmad, *G. sg.* | -ti, *N. sg.* |
| 'destiny, | Oh, | powerful,' | thus | of me | the thought. |

अन्यच्च । व्योमैकान्तविहारिणो ऽपि विहगाः संप्राप्नुवंत्यापदं ।

| | | | | | | |
|---|---|---|---|---|---|---|
| anyad | cha, | vyoman-ekânta-vihârinas | api | vihagâs | sam-pra-âpnuvanti | â-padam, |
| -ya, *N. sg.n.* | *Ind.* | *Ttp.* -rin, *N. pl. m.* | *Ind.* | -ga, *N. pl.* | âp, *with* sam *and* pra, 3 *pl. Pres.Par.* | -pad, *Ac. sg.* |
| Again | and, | In the air-exclusively-roaming | even | birds | meet | misfortune, |

बध्यंते निपुणैरगाधसलिलान्मत्स्याः समुद्रादपि ।

| | | | | | |
|---|---|---|---|---|---|
| badhyante | nipunais | agâdha-salilât | matsyâs | samudrât | api; |
| bandh, 3 *pl. Pres.Pass.* | -na, *I. pl. m.* | *Bahuv.* -la, *Ab. sg. m.* | -ya, *N. pl.* | -ra, *Ab. sg.* | *Ind.* |
| captured are | by artful men | out of the deep-water containing | fishes | ocean | even; |

दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| dus-nîtam | kim | iha | asti, | kim | su-charitam? | kas | sthâna-lâbhe | gunas? |
| *Karm.* -ta, *N.sg.n.* | kim, *N. sg.n.* | *Ind.* | as, 3 *sg. Pres.Par.* | kim, *N. sg.n.* | *Karm.* -ta, *N. sg. n.* | kim, *N. sg.n.* | *Ttp.* -bha, *L. sg.* | -na, *N. sg.* |
| Badly-conducted | what | here | is, | what | well-performed? | what | in position-obtainment | merit? |

कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥ ५१ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| kâlas | hi | vyasana-prasârita-karas | grihnâti | dûrât | api. | (51) |
| -la, *N. sg.* | *Ind.* | *Bahuv.* -ra, *N. sg. m.* | grah, 3 *sg. Pres. Par.* | -ra, *Ab. sg. n.* | *Ind.* | |
| time | for | to destruction-having forth stretched-the hands | seizes | from afar | even. | |

इति प्रबोध्यातिथ्यं कृत्वालिंग्य च चित्रग्रीवस्तेन

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| iti | pra-bodhya | âtithyam | kritvâ | â-lingya | cha | chitra-grîvas | tena |
| *Ind.* | budh *with* pra, *Ger. Caus.* | -ya, *Ac. sg.* | kri, *Ger.* | ling *with* â, *Ger.* | *Ind.* | *Bahuv.* -va, *N. sg.* | tad, *I. sg. m.* |
| Thus | having instructed, | hospitality | having made, | having embraced | and, | Chitragrîva | by him |

संप्रेषितो यथेष्टदेशान्सपरिवारो ययौ । हिरण्यको

| | | | | |
|---|---|---|---|---|
| sam-pra-eshitas | yathâ-ishta-desân | sa-parivâras | yayau; | hiranyakas |
| ish *with* sam *and* pra, *N. sg. m. past Ptc. Pass. Caus.* | *Karm.* -sa, *Ac. pl.* | *Bahuv.* -ra, *N. sg. m.* | yâ, 3 *sg. Perf. Par.* | -ka, *N. sg.* |
| dismissed | to ad libitum-places | with-attendants | went; | Hiranyaka |

ऽपि स्वविवरं प्रविष्टः ।

| | | |
|---|---|---|
| api | sva-vivaram | pra-vishtas. |
| *Ind.* | *Karm.* -ra, *Ac. sg.* | viś *with* pra, *N. sg. m. past Ptc. Pass.* |
| also | his-hole | entered. |

यानि कानि च मित्राणि कर्तव्यानि शतानि च ।

| | | | | | | |
|---|---|---|---|---|---|---|
| yâni | kâni | cha | mitrâni | kartavyâni | śatâni | cha; |
| yad, *N. pl. n.* | kim, *N. pl. n.* | *Ind.* | -ra, *N. pl.* | kri, *N. pl. n. Ptc. Fut. Pass.* | -ta, *N. pl.* | *Ind.* |
| Whosoever | | | friends | are to be made | hundreds | and; |

पश्य मूषिकमित्रेण कपोता मुक्तबंधनाः ॥ ५२ ॥

| | | | | |
|---|---|---|---|---|
| paśya | mûshika-mitrena | kapotâs | mukta-bandhanâs. | (52) |
| dris, 2 *sg. Imp. Par.* | *Karm.* -ra. *I. sg.* | -ta, *N. pl.* | *Bahuv.* -na, *N. pl. m.* | |
| Behold, | through the mouse-friend | the pigeons | bond-delivered. | |

अथ लघुपतनकनामा काकः सर्ववृत्तांतदर्शी साश्चर्यमि-

| | | | | |
|---|---|---|---|---|
| atha | laghupatanaka-nâmâ | kâkas | sarva-vrittânta-darśî | sa-âścharyam |
| *Ind.* | *Bahuv.* -man, *N. sg. m.* | -ka, *N. sg.* | *Ttp.* -śin, *N. sg. m.* | *Avyay.* |
| Now | Laghupatanaka-named | the crow | the whole-event-seeing | with astonishment |

इदमाह । अहो हिरण्यक श्लाघ्यो ऽसि । अतो ऽहम-

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| idam | âha : | aho | hiraṇyaka | ślâghyas | asi ; | atas | aham |
| idam, *Ac. sg. n.* | ah, 3 *sg. Perf. Par.* | *Ind.* | -ka, *V. sg.* | ślâgh, *N. sg. m. Ptc. Fut. Pass.* | as, 2 *sg. Pres. Par.* | *Ind.* | asmad, *N. sg.* |
| this | said : | Oh | Hiraṇyaka, | to be praised | thou art ; | hence | I |

पि त्वया सह मैत्रीमिच्छामि । अतो मां मैत्र्येणानुग्रहीतु-

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| api | tvayâ | saha | maitrîm | ichchhâmi ; | atas | mâm | maitryeṇa | anu-grahîtum |
| *Ind.* | yushmad, *I. sg.* | *Ind.* | -rî, *Ac. sg.* | ish, 1 *sg. Pres. Par.* | *Ind.* | asmad, *Ac. sg.* | -ya, *I. sg.* | grah *with* anu, *Inf.* |
| also | thee | with | friendship | wish ; | therefore | me | with friendship | to favour |

मर्हसि । एतच्छ्रुत्वा हिरण्यको ऽपि विवराभ्यंतरादाह ।

| | | | | | | |
|---|---|---|---|---|---|---|
| arhasi. | etad | śrutvâ | hiraṇyakas | api | vivara-abhyantarât | âha : |
| arh, 2 *sg. Pres. Par.* | etad, *Ac. sg. n.* | śru, *Ger.* | -ka, *N. sg.* | *Ind.* | *Ttp.* -ra, *Ab. sg.* | ah, 3 *sg.* |
| deign. | This | having heard | Hiraṇyaka | also | from the hole's-inside | said : |

कस्त्वं । स ब्रूते । लघुपतनकनामा वायसो ऽहं ।

| | | | | | | |
|---|---|---|---|---|---|---|
| kas | tvam ? | sas | brûte : | laghupatanaka-nâmâ | vâyasas | aham. |
| kim, *N. sg. m.* | yushmad, *N. sg.* | tad, *N. sg. m.* | brû, 3 *sg. Pres. Âtm.* | *Bahuv.* -man, *N. sg. m.* | -sa, *N. sg.* | asmad, *N. sg.* |
| Who | thou ? | He | says : | Laghupatanaka-named | a crow | I. |

हिरण्यको विहस्याह । का त्वया सह मैत्री ।

| | | | | | | |
|---|---|---|---|---|---|---|
| hiraṇyakas | vi-hasya | âha : | kâ | tvayâ | saha | maitrî ? |
| -ka, *N. sg.* | has *with* vi *Ger.* | ah, 3 *sg. Perf. Par.* | kim, *N. sg. f.* | yushmad, *I. sg.* | *Ind.* | -rî, *N. sg.* |
| Hiraṇyaka, | laughing, | says : | What | thee | with | friendship ? |

यतः । यद्येन युज्यते लोके बुधस्तत्तेन योजयेत् ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| yatas, | yad | yena | yujyate | loke | budhas | tad | tena | yojayet ; |
| *Ind.* | yad, *N. sg. n.* | yad, *I. sg. n.* | yuj, 3 *sg. Pres. Pass.* | -ka, *L. sg.* | -dha, *N. sg. m.* | tad, *Ac. sg. n.* | tad, *I. sg. n.* | yuj, 3 *sg. Pot. Par. Caus.* |
| For, | What | with what | is fitting | in the world, | a wise man | that | with that | should unite ; |

अहमन्नं भवान्भोक्ता कथं प्रीतिर्भविष्यति ॥ ५३ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| aham | annam | bhavân | bhoktâ ; | katham | prîtis | bhavishyati ? (53) |
| asmad, *N. sg.* | -na, *N. sg.* | -vat, *N. sg. m.* | -tri, *N. sg. m.* | *Ind.* | -ti, *N. sg.* | bhû, 3 *sg. Fut.* ii. *Par.* |
| I | the food, | you | the eater ; | how | love | will be ? |

अपरं च । भक्ष्यभक्षकयोः प्रीतिः विपत्तेरेव कारणं ।

| | | | | | | |
|---|---|---|---|---|---|---|
| aparam | cha, | bhakshya-bhakshakayos | prîtis | vi-pattes | eva | kâraṇam ; |
| -ra, *N. sg. n.* | *Ind.* | *Dvandva.* -ka, *G. du. m.* | -ti, *N. sg.* | -tti, *G. sg.* | *Ind.* | -ṇa, *N. sg.* |
| Another | and, | Of the food- (and)- the feeder | love, | of misfortune | alone | the cause ; |

शृगालात्पाशबद्धो ऽसौ मृगः काकेन रक्षितः ॥ ५४ ॥

| | | | | | |
|---|---|---|---|---|---|
| śṛigâlât | pâśa-baddhas | asau | mṛigas | kâkena | rakshitas. (54) |
| -la, *Ab. sg.* | *Ttp.* -dha, *N. sg. m.* | adas, *N. sg. m.* | -ga, *N. sg.* | -ka, *I. sg.* | raksh, *N. sg. m. past Ptc. Pass.* |
| through a jackal | snare-bound | that | deer | by the crow | saved. |

वायसो ऽब्रवीत् । कथमेतत् । हिरण्यकः कथयति । अस्ति मगधदेशे

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| vâyasas | abravît : | katham | etad ? | hiraṇyakas | kathayati : | asti | magadha-deśe |
| -sa, *N. sg.* | brû, 3 *sg. Impf. Par.* | *Ind.* | etad, *N. sg. n.* | -ka, *N. sg.* | kath, 3 *sg. Pres. Par.* | as, 3 *sg. Pres. Par.* | *Karm.* -śa, *L. sg.* |
| The crow | said : | How | that ? | Hiraṇyaka | relates : | There is | in the Magadha-country |

चंपकवती नामारण्यानी। तस्यां चिरान्महता स्नेहेन

| | | | | | | |
|---|---|---|---|---|---|---|
| champakavatî | nâma | aranyânî ; | tasyâm | chirât | mahatâ | snehena |
| -tî, *N. sg.* | -man, *Ac. sg. Adv.* | -nî, *N. sg.* | tad, *L. sg. f.* | -ra, *Ab. sg. n. Adv.* | -hat, *I. sg. m.* | -ha, *I. sg.* |
| Champakavatî | by name | a large wood; | therein | since long | with great | affection |

मृगकाकौ निवसतः। स च मृगः स्वेच्छया भ्राम्यन्

| | | | | | | |
|---|---|---|---|---|---|---|
| mriga-kâkau | ni-vasatas. | sas | cha | mrigas | sva-ichchhayâ | bhrâmyan |
| *Dvandva.* -ka, *N. du.* | vas *with* ni, 3 *du. Pres. Par.* | tad, *N. sg. m.* | *Ind.* | -ga, *N. sg.* | *Karm.* -châ, *I. sg.* | bhram. *N. sg. m Ptc. Pres. Par* |
| a deer- (and) a crow | dwell. | That | and | deer | at his-pleasure | roaming |

हृष्टपुष्टांगः केनचिच्छृगालेनावलोकितः। तं दृष्ट्वा शृगालो

| | | | | | | |
|---|---|---|---|---|---|---|
| hrishta-pushta-angas | kena - chid | srigâlena | ava-lokitas. | tam | drishtvâ | srigâlas |
| *Bahuv.* -ga, *N. sg. m.* | kim, *I. sg. m. Ind.* | -la, *I. sg.* | lok *with* ava, *N. sg. m. past Ptc. Pass.* | tad, *Ac. sg. m.* | dris, *Ger.* | -la, *N. sg.* |
| frisky-fat-limbed | by some | jackal | (was) espied. | Him | having seen | the jackal |

ऽचिंतयत्। आः कथमेतन्मांसं सुललितं भक्षयामि। भवतु

| | | | | | | |
|---|---|---|---|---|---|---|
| achintayat : | âh | katham | etad-mâmsam | su-lalitam | bhakshayâmi ? | bhavatu, |
| chint, 3 *sg. Impf. Par.* | *Ind.* | *Ind.* | *Ttp.* -sa, *Ac. sg.* | *Karm.* -ta, *Ac. sg. n.* | bhaksh, 1 *sg. Pres. Par.* | bhû, 3 *sg. Imp. Par.* |
| thought : | Ah, | how | of him-the meat | the very-delicate | I eat ? | Be it, |

विश्वासं तावदुत्पादयामि। इत्यालोच्योपसृत्याब्रवीत्।

| | | | | | | |
|---|---|---|---|---|---|---|
| vi-svâsam | tâvat | ud-pâdayâmi. | iti | â-lochya | upa-sritya | abravît : |
| -sa, *Ac. sg.* | *Ind.* | pad *with* ud, 1 *sg. Pres. Par. Caus.* | *Ind.* | loch *with* â, *Ger.* | sri *with* upa, *Ger.* | brû, 3 *sg. Impf. Par.* |
| confidence | first | I produce. | Thus | having thought | having approached | he said : |

मित्र कुशलं ते। मृगेणोक्तं। कस्त्वं। स

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| mitra | kusalam | te. | mrigena | uktam : | kas | tvam ? | sas |
| -ra, *V. sg.* | -la, *N. sg. n.* | yushmad, *D. sg.* | -ga, *I. sg.* | vach, *N. sg. n. past Ptc. Pass.* | kim, *N. sg. m.* | yushmad, *N. sg.* | tad, *N. sg. m.* |
| Friend, | hail | to thee. | By the deer | said : | Who | thou ? | He |

ब्रूते। क्षुद्रबुद्धिनामा जंबुको ऽहं। अत्रारण्ये बंधुहीनो

| | | | | | | |
|---|---|---|---|---|---|---|
| brûte : | kshudrabuddhi-nâmâ | jambukas | aham ; | atra | aranye | bandhu-hînas |
| brû, 3 *sg. Pres. Âtm.* | *Bahuv.* -man, *N. sg. m.* | -ka, *N. sg.* | asmad, *N. sg.* | *Ind.* | -ya, *L. sg.* | *Ttp.* -na, *N. sg. m.* (hâ) |
| says : | Kshudrabuddhi-named | a jackal | I; | here | in the wood | relation-deprived |

मृतवन्निवसामि। इदानीं त्वां मित्रमासाद्य पुनः सबंधु-

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| mrita-vat | ni-vasâmi ; | idânîm | tvâm | mitram | â-sâdya | punar | sa-bandhus |
| *Ind.* | vas *with* ni, 1 *sg. Pres. Par.* | *Ind.* | yushmad, *Ac. sg.* | -ra, *Ac. sg.* | sad *with* â, *Ger. Caus.* | *Ind.* | *Bahuv.* -dhu, *N. sg. m.* |
| dead-like | I dwell ; | now | thee | a friend | having found | again | relation-possessed |

र्जीवलोकं प्रविष्टो ऽस्मि। अधुना तवानुचरेण मया सर्वथा

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| jîva-lokam | pra-vishtas | asmi ; | adhunâ | tava | anu-charena | mayâ | sarvathâ |
| *Ttp.* -ka, *Ac. sg.* | vis *with* pra, *N. sg. m. past Ptc. Pass.* | as, 1 *sg. Pres. Par.* | *Ind.* | yushmad, *G. sg.* | -ra, *I. sg. m.* | asmad, *I. sg.* | *Ind.* |
| into of the living-the world | entered | I am ; | now | of thee | the attendant | by me | wholly |

भवितव्यं। मृगेणोक्तं। एवमस्तु। ततः पश्चादस्तंगते

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| bhavitavyam. | mrigena | uktam : | evam | astu. | tatas | paschât | astam-gate |
| bhû, *N. sg. n. Ptc. Fut. Pass.* | -ga, *I. sg.* | vach, *N. sg. n. past Ptc. Pass.* | *Ind.* | as, 3 *sg. Imp. Par.* | *Ind.* | *Ind.* | gam *with* astam, *L. s m. past Ptc. Pass.* |
| to be. | By the deer | said : | Thus | it be. | There-after, | | having gone-home |

सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ ।

| | | | | | | |
|---|---|---|---|---|---|---|
| savitari | bhagavati | marîchi-mâlini | tau | mṛigasya | vâsa-bhûmim | gatau. |
| -tṛi, *L. sg.* | -vat, *L. sg. m.* | *Bahuv.* -lin, *L. sg. m.* | tad, *N. du. m.* | -ga, *G. sg.* | *Ttp.* -mi, *Ac. sg.* | gam, *N. du. m. past Ptc. Pass.* |
| the sun, | the venerable, | the ray-garlanded, | those two | of the deer | to the dwelling-place | proceeded. |

तत्र चंपकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चिरमित्रं

| | | | | | |
|---|---|---|---|---|---|
| tatra | champaka-vṛiksha-śâkhâyâm | subuddhi-nâmâ | kâkas | mṛigasya | chira-mitram |
| *Ind.* | *Ttp.* -khâ, *L. sg.* | *Bahuv.* -man, *N. sg. m.* | -ka, *N. sg.* | -ga, *G. sg.* | *Karm.* -ra, *N. sg.* |
| There | on a Champaka-tree-branch | Subuddhi-named | a crow, | of the deer | an old-friend, |

निवसति । तौ दृष्ट्वा काको ऽवदत् । सखे चित्रांग को

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ni-vasati. | tau | dṛishṭvâ | kâkas | avadat: | sakhe | chitra-aṅga, | kas |
| vas *with* ni, 3 *sg. Pres. Par.* | tad, *Ac. du. m.* | dṛiś, *Ger.* | -ka, *N. sg.* | vad, 3 *sg. Impf. Par.* | -khi, *V. sg.* | *Bahuv.* -ga, *V. sg.* | kim, *N. sg. m.* |
| dwells. | Those two | having seen | the crow | said: | Friend | Chitrâṅga, | who |

ऽयं द्वितीयः । मृगो ब्रूते । जंबुको ऽयमस्मत्सख्यमिच्छन्ना-

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ayam | dvitîyas? | mṛigas | brûte: | jambukas | ayam | asmad-sakhyam | ichchhan |
| idam, *N. sg. m.* | -ya, *N. sg. m.* | -ga, *N. sg.* | brû, 3 *sg. Pres. Âtm.* | -ka, *N. sg.* | idam, *N. sg. m.* | *Ttp.* -ya, *Ac. sg.* | ish, *N. sg. m. Ptc. Pres. Par.* |
| this | second? | The deer | says: | A jackal | this | of us-the friendship | wishing |

गतः । काको ब्रूते । मित्र अकस्मादागंतुना सह मैत्री

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| â-gatas. | kâkas | brûte: | mitra | a-kasmât | â-gantunâ | saha | maitrî |
| gam *with* â, *N. sg. m. past Ptc. Pass.* | -ka, *N. sg.* | brû, 3 *sg. Pres. Âtm.* | -ra, *V. sg.* | *Ind.* (kim) | -tu, *I. sg.* | *Ind.* | -rî, *N. sg.* |
| approached. | The crow | says: | Friend, | from no-where | a comer | with, | friendship |

न युक्ता । तथा चोक्तं ।

| | | | | |
|---|---|---|---|---|
| na | yuktâ; | tatha | cha | uktam: |
| *Ind.* | yuj, *N. sg. f. past Ptc. Pass.* | *Ind.* | *Ind.* | vach, *N. sg. n. past Ptc. Pass.* |
| not | proper; | thus | and | said: |

अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।

| | | | | |
|---|---|---|---|---|
| a-jñâta-kula-śîlasya | vâsas | deyas | na | kasya-chid, |
| *Bahuv.* -la, *G. sg. m.* | -sa, *N. sg.* | dâ, *N. sg. m. Ptc. Fut Pass.* | *Ind.* | kim, *G. sg. m. Ind.* |
| Of one of unknown-family-(and) character | residence | to be given | not | of any one; |

मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥ ५५ ॥

| | | | | | |
|---|---|---|---|---|---|
| mârjârasya | hi | doshena | hatas | gṛidhras | jaradgavas. (55) |
| -ra, *G. sg.* | *Ind.* | -sha, *I. sg.* | han, *N. sg. m. past Ptc. Pass.* | -ra, *N. sg.* | -va, *N. sg.* |
| of a cat | for | through the offence | slain | the vulture | Jaradgava. |

तावाहतुः । कथमेतत् । काकः कथयति ।

| | | | | | |
|---|---|---|---|---|---|
| tau | âhatus: | katham | etad? | kâkas | kathayati. |
| tad, *N. du. m.* | ah, 3 *du. Perf. Par.* | *Ind.* | etad, *N. sg. n.* | -ka, *N. sg.* | kath, 3 *sg. Pres. Par.* |
| They both | say: | How | that? | The crow | relates: |

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान्पर्कटीवृक्षः ।

| | | | | | |
|---|---|---|---|---|---|
| as, 3 *sg. Pres. Par.* | *Ttp.* -ra, *L. sg.* | *Bahuv.* -man, *L. sg. m.* | -ta, *L. sg.* | -hat, *N. sg. m.* | *Karm.* -ksha, *N. sg.* |
| There is | on the Ganges-bank, | upon a Gṛidhra-kûṭa-named | mountain | a large | fig-tree. |

तस्य कोटरे दैवदुर्विपाकाद्गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति ।

| | | | | | | |
|---|---|---|---|---|---|---|
| tad, G. sg. m. | -ra, L. sg. | Ttp. -ka, Ab. sg. | Bahuv. -na, N. sg. m. | Bahuv. -man, N. sg. m. | -ra, N. sg. | vas with prati, 3 sg. Pres. Par. |
| Of it | in the hollow | through fate's-hard doom | having lost-claws-(and) eyes | Jaradgava-named | a vulture | dwells. |

अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात्किंचित्किंचिदुद्धृत्य

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| Ind. | -pâ, I. sg. | Ttp. -na, D. sg. | Ttp. -sin, N. pl. m. | -kshin, N. pl. m. | Karm. -ra, Ab. sg. | kim-chid, Ac. sg. n. | | hri with ud, Ger. |
| Now | through pity | of him-for the support | on that-tree-roosting | birds | from their own-food | a little | a little | having taken |

ददति । तेनासौ जीवति । अथ कदाचिद्दीर्घकर्णनामा मार्जारः

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| dâ, 3 pl. Pres. Par. | tad, I. sg. n. | adas, N. sg. m. | jiv, 3 sg. Pres. Par. | Ind. | Ind | Bahuv. -man, N. sg. m. | -ra, N. sg. |
| give. | By that | he | lives. | Now | one day | Dîrghakarṇa-named | a cat |

पक्षिशावकान्भक्षितुं तत्रागतः । ततस्तमा-

| | | | | | |
|---|---|---|---|---|---|
| Ttp. -ka, Ac. pl. m. | bhaksh, Inf. | Ind. | gam with â, N. sg. m. past Ptc. Pass. | Ind. | tad, Ac. sg. m. |
| of the birds-the young ones | to eat | there | arrived. | Then | him |

यांतं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः ।

| | | | | | |
|---|---|---|---|---|---|
| yâ with â, Ac. sg. m. Ptc. Pres. Par. | dṛiś, Ger. | Ttp. -ka, I. pl. m. | Ttp. -ta, I. pl. m. | -la, N. sg. | kṛi, N. sg. m. past Ptc. Pass. |
| approaching | having seen | of the birds-by the young ones, | fear-stricken, | clamour | made. |

तच्छ्रुत्वा जरद्गवेनोक्तं । को ऽयमायाति । दीर्घकर्णो

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| tad, Ac. sg. n. | śru, Ger. | -va, I. sg. | vach, N. sg. n. past Ptc. Pass. | kim, N. sg. m. | idam, N. sg. m. | yâ with â, 3 sg. Pres. Par. | Bahuv. -ṇa, N. sg. |
| That | having heard | by Jaradgava | said: | Who | this | approaches? | Dîrghakarṇa, |

गृध्रमवलोक्य सभयमाह । हा हतो ऽस्मि ।

| | | | | | | |
|---|---|---|---|---|---|---|
| -ra, Ac. sg. | lok with ava, Ger. | Avyay. | ah, 3 sg. Perf. Par. | Ind. | han, N. sg. m. past Ptc. Pass. | as, 1 sg. Pres. Par. |
| the vulture | having perceived, | with fear | said: | Oh, | lost | I am. |

यतः । तावद्भयस्य भेतव्यं यावद्भयमनागतं ।

| | | | | | | |
|---|---|---|---|---|---|---|
| Ind. | -vat, Ac. sg. n. Adv. | -ya, G. sg. | bhî, N. sg. n. Ptc. Fut. Pass. | -vat, Ac. sg. n. Adv. | -ya, N. sg. n. | Karm. -ta, N. sg. n. (rt. gam with â) |
| Since, | So long | of danger | one must be afraid, | as | danger | not-approached, |

आगतं तु भयं वीक्ष्य नरः कुर्याद्यथोचितं ॥ ५६ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| gam with â, Ac. sg. n. past Ptc. Pass. | Ind. | -ya, Ac. sg. | îksh with vi, Ger. | -ra, N. sg. | kṛi, 3 sg. Pot. Par. | Ind. | -ta, N. sg. n. |
| approached | but | danger | having seen | a man | should act | as | proper. (56) |

अधुनास्य संनिधाने पलायितुमक्षमः । तद्यथा भवितव्यं

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| Ind. | idam, G. sg. m. | -na, L. sg. | ay with palâ, Inf. | Karm. -ma, N. sg. m. | Ind. | Ind. | bhû, N. sg. n. Ptc. Fut. Pass. |
| Now | of him | in the presence | to escape | unable; | therefore | as | it is to be, |

तद्भवतु तावद्विश्वासमुत्पाद्यास्य समीप-

tad, *N. sg. n.* bhû, 3 *sg. Imp. Par.* *Ind.* -sa, *Ac. sg.* pad *with* ud, *Ger. Caus.* idam, *G. sg. m.* -pa, *Ac. sg. n.*
that let be; first confidence having produced of him to the proximity

मुपगच्छामि । इत्यालोच्योपसृत्याब्रवीत् ।

gam *with* upa, 1 *sg. Pres. Par.* *Ind.* loch *with* â, *Ger.* sri *with* upa, *Ger.* brû, 3 *sg. Impf. Par.*
I approach. Thus having reflected, having near-gone, he said:

आर्य त्वामभिवंदे । गृध्रो ऽवदत् । कस्त्वं ।

-ya, *V. sg.* yushmad, *Ac. sg.* vand *with* abhi, 1 *sg. Pres. Âtm.* -ra, *N. sg.* vad, 3 *sg. Impf. Par.* kim, *N. sg. m.* yushmad, *N. sg.*
Reverend Sir, thee I salute. The vulture said: Who thou?

सो ऽवदत् । मार्जारो ऽहं । गृध्रो ब्रूते ।

tad, *N. sg. m.* vad, 3 *sg. Impf. Par.* -ra, *N. sg.* asmad, *N. sg.* -ra, *N. sg.* brû, 3 *sg. Pres. Âtm.*
He said: A cat I. The vulture says:

दूरमपसर नो चेद्धंतव्यो ऽसि मया । मार्जारो ऽवदत् ।

-ra, *Ac. sg. n. Adv.* sri *with* apa, 2 *sg. Imp. Par.* *Ind.* *Ind.* han, *N. sg. m. Ptc. Fut. Pass.* as, 2 *sg. Pres. Par.* asmad, *I. sg.* -ra, *N. sg.* vad, 3 *sg. Impf. Par.*
Far away-go; not if, to be killed thou art by me. The cat said:

श्रूयतां तावदस्मद्वचनं ततो यद्यहं वध्यस्तदा हंतव्यः ।

sru, 3 *sg. Imp. Pass.* *Ind.* *Ttp.* -na, *N. sg.* *Ind.* *Ind.* asmad, *N. sg.* -ya, *N. sg. m.* (*rt.* han) *Ind.* han, *N. sg. m. Ptc. Fut. Pass.*
It may be heard first of me-the speech; thereafter if I to be punished, then to be killed.

यतः । जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ।

*Ind.* *Ttp.* -ra, *I. sg.* *Ind.* kim-chid, *N. sg. m.* han, 3 *sg. Pres. Pass.* pûj, 3 *sg. Pres. Pass.* *Ind.*
For, Through birth-merely any one is punished, is honoured anywhere?

व्यवहारं परिज्ञाय वध्यः पूज्यो ऽथवा भवेत् ॥ ५७ ॥

-ra, *Ac. sg.* jñâ, *with* pari, *Ger.* -ya, *N. sg. m.* (*rt.* han) pûj, *N. sg. m. Ptc. Fut. Pass.* *Ind.* bhû, 3 *sg. Pot. Par.*
the conduct having scrutinised to be punished to be honoured or he should be. (57)

गृध्रो ब्रूते । ब्रूहि किमर्थमागतो ऽसि । सो ऽवदत् ।

-ra, *N. sg.* brû, 3 *sg. Pres. Âtm.* 2 *sg. Imp. Par.* *Ind.* gam *with* â, *N. sg. m. past. Ptc. Pass.* as, 2 *sg. Pres. Par.* tad, *N. sg. m.* vad, 3 *sg. Impf. Par.*
The vulture says: Say, wherefore approached thou art? He said:

अहमत्र गंगातीरे नित्यस्नायी ब्रह्मचारी चांद्रायणव्रत-

asmad, *N. sg.* *Ind.* *Ttp.* -ra, *L. sg.* *Karm.* -yin, *N. sg. m.* *Ttp.* -rin, *N. sg. m.* *Karm.* -ta, *Ac. sg.*
I here on the Ganges-bank, constantly-bathing, religious study-observing the Châudrâyaṇa-vow

माचरंस्तिष्ठामि । युष्मान्धर्मज्ञानरतान्विश्वासभूमयः

char *with* â, *N.sg.m. Ptc.Pres.Par.* sthâ, 1 *sg. Pres.Par.* yushmad, *Ac.pl.* *Ttp.* -ta, *Ac. pl. m.* *Ttp.* -mi, *N. pl.*

performing, stay. You of duty-the knowledge-enjoying of confidence-objects

पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवंति । अतो भवद्भ्यो

-kshin, *N. pl. m.* -va, *N. pl. m.* *Ind.* asmad, *G.sg.* -ra, *L.sg. Adv.* stu *with* pra, 3 *pl. Pres.Par.* *Ind.* -vat, *Ab. pl. m.*

birds all always of me in the presence praise ; therefore from you,

विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः । भवंतश्चैतादृशा

*Ttp.* -dha, *Ab. pl. m.* -ma, *Ac. sg.* -sru, *Inf.* *Ind.* gam *with* â, *N.sg.m. past Ptc.Pass.* -vat, *N.pl.m.* *Ind.* -sa *N. pl. m.*

in wisdom-(and) age-old, the duty of religion to hear hither approached. You and such

धर्मज्ञा यन्मामतिथिं हंतुमुद्यताः । गृहस्थधर्मश्चैषः ।

*Ttp.* -jña, *N. pl. m.* *Ind.* asmad, *Ac.sg.* -thi, *Ac.sg.* han, *Inf.* yam *with* ud, *N.pl.m. past Ptc. Pass.* *Ttp.* -ma, *N.sg.* *Ind.* etad, *N. sg. m.*

of religion-knowers, that me a guest to kill ready. A householder's-duty and this :

अरावप्युचितं कार्यमातिथ्यं गृहमागते ।

-ri. *L.sg.* *Ind.* -ta, *Nsg. n.* kri, *N.sg. n. Ptc. Fut. Pass.* -ya, *N. sg.* -ha, *Ac. sg.* gam *with* â, *L. sg. m. past Ptc. Pass.*

To an enemy even proper to be exercised hospitality, to the house approached,

छेत्तुः पार्श्वगताच्छायां नोपसंहरते द्रुमः ॥ ५८ ॥

-tri, *Ab. sg.* *Ttp.* -ta, *Ab. sg. m.* -yâ, *Ac. sg.* *Ind.* hri, *with* upa-sam, 3 *sg. Pres. Âtm.* -ma, *N. sg.*

from the cutter to its side-come the shade not withdraws a tree. (58)

यदि वा धनं नास्ति तदा प्रीतिवचसाप्यतिथिः

*Ind.* *Ind.* -na, *N.sg.* *Ind.* as 3 *sg. Pres.Par.* *Ind.* *Ttp.* -chas, *I. sg.* *Ind.* -thi, *N.sg.*

If or property not there is, then with affection-speech at least a guest

पूज्य एव ।

pûj, *N. sg. m, Ptc. Fut. Pass.* *Ind.*

to be honoured certainly.

यतः । तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।

*Ind.* -ṇa, *N. pl.* -mi, *N. sg.* -ka, *N. sg.* -ch, *N. sg.* -tha, *N. sg. f.* *Ind.* -ta, *N. sg. f.*

For, Straw, room, water, speech as fourth and gentle,

एतान्यपि सतां गेहे नोच्छिद्यंते कदाचन ॥ ५९ ॥

etad, *N. pl. n.* *Ind.* -t, *G. pl. m.* -ha, *L. sg.* *Ind.* chhid *with* ud, 3 *pl. Pres. Pass.* *Ind.*

these together of the good in the house not are wanting at any time. (59)

अपरं च । निर्गुणेष्वपि सत्त्वेषु दयां कुर्वंति साधवः ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| -ra, *N. sg. n.* | *Ind.* | *Bahuv.* -ṇa, *L. pl. n.* | *Ind.* | -tva, *L. pl.* | -yâ, *Ac. sg.* | kṛi, 3 *pl. Pres. Par.* | -dhu, *N. pl. m.* |
| Another | and, | Unto worthless | even | beings | mercy | show | the good; |

न हि संहरते ज्योत्स्नां चंद्रश्चांडालवेश्मनि ॥ ६० ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| *Ind.* | *Ind.* | hṛi *with* sam, 3 *sg. Pres. Âtm.* | -nâ, *Ac. sg.* | -dra, *N. sg.* | *Ttp.* -man, *L. sg.* | |
| not | for | withholds | (her) light | the moon | at the Chânḍâla-dwelling. | (60) |

अन्यच्च । अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।

| | | | | | | |
|---|---|---|---|---|---|---|
| -ya, *N. sg. n.* | *Ind.* | -thi, *N. sg.* | yad, *G. sg. m.* | *Bahuv.* -śa, *N. sg. m.* | -ha, *Ab. sg.* | vṛit *with* prati-ni, 3 *sg. Pres. Âtm.* |
| Again | and, | A guest | of whom | broken-hoped | from the house | turns away, |

स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥ ६१ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| tad, *N. sg. m.* | *D. sg. m.* | *Karm.* -ta, *Ac. sg. n.* | dâ, *Ger.* | -ya, *Ac. sg.* | dâ *with* â, *Ger.* | gam, 3 *sg. Pres. Par.* | |
| He | to him | the guilt | having given, | the merit | having taken, | goes. | (61) |

अन्यच्च । उत्तमस्यापि वर्णस्य नीचो ऽपि गृहमागतः ।

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| -ya, *N. sg. n.* | *Ind.* | -ma, *G. sg. m.* | *Ind.* | -ṇa, *G. sg.* | -cha, *N. sg. m.* | *Ind.* | -ha, *Ac. sg.* | gam *with* â, *N. sg. m. past Ptc. Pass.* |
| Again | and, | Of the highest | even | caste | a low person | even | to the house | come |

पूजनीयो यथा योग्यं सर्वदेवमयो ऽतिथिः ॥ ६२ ॥

| | | | | | |
|---|---|---|---|---|---|
| pûj, *N. sg. m. Ptc. Fut. Pass.* | *Ind.* | -ya, *N. sg. n.* | -ya, *N. sg. m.* | -thi, *N. sg.* | |
| to be honoured | as | proper, | all-gods representing | a guest. | (62) |

गृध्रो ऽवदत् । मार्जारो हि मांसरुचिः पक्षिशावकाश्चात्र

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| -ra, *N. sg.* | vad, 3 *sg. Impf. Par.* | -ra, *N. sg.* | *Ind.* | *Bahuv.* -chi, *N. sg. m.* | *Ttp.* -ka, *N. pl. m.* | *Ind.* | *Ind.* |
| The vulture | said: | Cat | certainly | meat-liking, | of birds-the young ones | and | here |

निवसंति तेनाहमेवं ब्रवीमि । तच्छ्रुत्वा मार्जारो

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| vas *with* ni, 3 *pl. Pres. Par.* | tad, *I. sg. n. Adv.* | asmad, *N. sg.* | *Ind.* | brû, 1 *sg. Pres. Par.* | tad, *Ac. sg. n.* | śru, *Ger.* | -ra, *N. sg.* |
| dwell, | therefore | I | thus | speak. | This | having heard | the cat |

भूमिं स्पृष्ट्वा कर्णौ स्पृशति ब्रूते च । मया धर्मशास्त्रं

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| -mi, *Ac. sg.* | spṛiś, *Ger.* | -ṇa, *Ac. du.* | spṛiś, 3 *sg. Pres. Par.* | brû, 3 *sg. Pres. Âtm.* | *Ind.* | asmad, *I. sg.* | *Ttp.* -ra, *Ac. sg.* |
| the ground | having touched, | the ears | touches, | says | and: | By me | the law-book |

श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चांद्रायणमध्यवसितं ।

| | | | | | | |
|---|---|---|---|---|---|---|
| śru, *Ger.* | *Bahuv.* -ga, *I. sg. m.* | idam, *N. sg. n.* | -ra. *N. sg. n.* | -ta, *N. sg.* | -ṇa, *N. sg. n.* | so *with* adhi-ava *N. sg. n. past. Ptc. Pass.* |
| having heard, | with gone-passions, | this | difficult | vow | Chândrâyaṇa | undertaken. |

परस्परं विवदमानानामपि धर्मशास्त्राणामहिंसा परमो

*Ind.* vad *with* vi, *G. pl. n. Ptc. Pres. Âtm.* *Ind.* *Ttp.* -ra, *G. pl.* *Karm.* -sâ, *N. sg.* -ma, *N. sg. m.*

With-one-another of the disputing even law-books 'not-injuring the highest

धर्म इत्यत्रैकमत्यं । यतः ।

-ma, *N. sg.* *Ind.* *Ind.* -ya, *N. sg.* *Ind.*

duty' thus here unanimity. For,

सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये ।

*Ttp.* -ta, *N. pl. m.* (*rt.* vṛit *with* ni). yad, *N. pl. m.* -ra, *N. pl.* *Ttp.* -ha, *N. pl. m.* *Ind.* yad, *N. pl. m.*

From all-injury-abstaining which men, all-enduring and who,

सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ ६३ ॥

-va, *G. sg. n.* *Karm.* -ta, *N. pl. m.* *Ind.* tad, *N. pl. m.* -ra, *N. pl.* *Ttp.* -min, *N. pl. m.*

of everything support-being and, those men to heaven-going. (63)

एक एव सुहृद्धर्मो निधने ऽप्यनुयाति यः ।

-ka, *N. sg. m.* *Ind.* -d, *N. sg.* -ma, *N. sg.* -na, *L. sg.* *Ind.* yâ *with* anu, 3 *sg. Pres. Par.* yad, *N. sg. m.*

One only friend, virtue, in death even follows who,

शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ॥ ६४ ॥

-ra, *I. sg.* -ma, *Ac. sg. n. Adv.* -śa, *Ac. sg.* -va, *N. sg. n.* -ya, *N. sg. n.* *Ind.* gam, 3 *sg. Pres. Par.*

with the body together to destruction everything else but goes. (64)

यो ऽत्ति यस्य यदा मांसमुभयोः पश्यतांतरं ।

yad, *N. sg. m.* ad, 3 *sg. Pres. Par.* yad, *G. sg. m.* *Ind.* -sa, *Ac. sg.* -bha, *G. du. m.* dṛiś, 2 *pl. Imp. Par.* -ra. *Ac. sg.*

Who eats of whom when the flesh, of both behold the difference,

एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते ॥ ६५ ॥

-ka, *G. sg. m.* -ka, *N. sg. f.* -ti, *N. sg.* -ya, *N. sg.* -ṇa, *I. pl.* much *with* vi, 3 *sg. Pres. Pass.*

of the one momentary enjoyment, the other of life deprived. (65)

मर्तव्यमिति यद्दुःखं पुरुषस्योपजायते ।

mṛi, *N. sg. n. Ptc. Fut. Pass.* *Ind.* yad, *N. sg. n.* -kha, *N. sg.* -sha, *G. sg.* jan *with* upa, 3 *sg. Pres. Âtm.*

'It must be died,' thus what pain of a man is produced,

शक्यस्तेनानुमानेन परो ऽपि परिरक्षितुं ॥ ६६ ॥

-ya, *N. sg. m.* tad, *I. sg. n.* -na, *I. sg.* -ra, *N. sg. m.* *Ind.* raksh *with* pari, *Inf.*

possible by that analogy an enemy even to save. (66)

शृणु पुनः । स्वच्छंदवनजातेन शाकेनापि प्रपूर्यते ।

| | | | | | |
|---|---|---|---|---|---|
| śru, 2 *sg. Imp. Par.* | *Ind.* | *Ttp.* -ta, *I. sg. m.* or *n.* | -ka, *I. sg.* | *Ind.* | prî *with* pra, 3 *sg. Pres. Pass.* |
| Listen | again, | By the spontaneously-in the wood-growing | herb | even | it is filled, |

अस्य दग्धोदरस्यार्थे कः कुर्यात्पातकं महत् ॥ ६७ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| idam, *G. sg. n.* | *Karm.* -ra, *G. sg.* | -tha, *L. sg. Adv.* | kim, *N. sg. m.* | kṛi, 3 *sg. Pot. Par.* | -ka, *Ac. sg.* | -hat, *Ac. sg. n.* |
| of this | burnt-stomach | on account of | who | would commit | a crime | great ? (67) |

एवं विश्वास्य स मार्जारस्तरुकोटरे स्थितः । ततो

| | | | | | | |
|---|---|---|---|---|---|---|
| *Ind.* | śvas, *with* vi, *Ger. Caus.* | tad, *N. sg. m.* | -ra, *N. sg.* | *Ttp.* -ra, *L. sg.* | sthâ, *N. sg. m. past Ptc. Pass.* | *Ind.* |
| Thus | having made to confide, | that | cat | in the tree-hollow | remained. | Then, |

दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटर-

| | | | | |
|---|---|---|---|---|
| -na, *L. pl.* | gam, *L. pl. m.* or *n. Ptc. Pres. Par.* | *Ttp.* -ka, *Ac. pl. m.* | kram *with* â, *Ger.* | -ra, *Ac. sg.* |
| the days | passing on, | of the birds-the young ones | having approached, | to the hollow |

मानीय प्रत्यहं खादति । येषामपत्यानि खादितानि

| | | | | | |
|---|---|---|---|---|---|
| nî *with* â, *Ger.* | *Ayvay.* | khâd, 3 *sg. Pres. Par.* | yad, *G. pl. m.* | -ya, *N. pl.* | khâd, *N. pl. n. past Ptc. Pass.* |
| having brought, | daily | he eats. | Of whom | the young ones | eaten, |

तैः शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा ।

| | | | | | |
|---|---|---|---|---|---|
| tad, *I. pl. m.* | *Ttp.* -ta, *I. pl. m.* | lap *with* vi, *I. pl. m. Ptc. Pres. Par.* | *Ind. Ind.* | -sâ, *N. sg.* | rabh *with* sam-â *N. sg. f. past Ptc. Pass.* |
| by those, | sorrow-pained, | wailing, | here (and) there | enquiry | begun. |

तत्परिज्ञाय मार्जारः कोटरान्निःसृत्य बहिः

| | | | | | |
|---|---|---|---|---|---|
| tad, *Ac. sg. n.* | jñâ, *with* pari, *Ger.* | -ra, *N. sg.* | -ra, *Ab. sg.* | sṛi *with* nis, *Ger.* | *Ind.* |
| That | having perceived, | the cat | from the hollow | having slipped | out |

पलायितः । पश्चात्पक्षिभिरितस्ततो निरूपयद्भिस्तत्र

| | | | | | |
|---|---|---|---|---|---|
| ay *with* palâ, *N. sg. m. past Ptc. Pass.* | *Ind.* | -kshin, *I. pl.* | *Ind. Ind.* | rûp *with* ni, *I. pl. m. Ptc. Pres. Par.* | *Ind.* |
| away-gone. | Afterwards | by the birds | here (and) there | searching, | there |

तरुकोटरे शावकास्थीनि प्राप्तानि । अनंतरं त ऊचुः ।

| | | | | | |
|---|---|---|---|---|---|
| *Ttp.* -ra, *L. sg.* | *Ttp.* -thi, *N. pl.* | âp *with* pra, *N. pl. n. past Ptc. Pass.* | *Ind.* | tad, *N. pl. m.* | vach, 3 *pl. Perf Par.* |
| in the tree-hollow | of the young ones-the bones | discovered. | Thereupon | they | said : |

अनेनैव जरद्गवेनास्माकं शावकाः खादिता इति सर्वैः

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| idam, *I. sg. m.* | *Ind.* | -va, *I. sg.* | asmad, *G. pl.* | -ka, *N. pl. m.* | khâd, *N. pl. m. past Ptc. Pass.* | *Ind.* | -va, *I. pl. m.* |
| 'By this | very | Jaradgava | of us | the young ones | eaten.' | Thus | by all |

पक्षिभिर्निश्चित्य गृध्रो व्यापादितः । अतो ऽहं

-kshin, *N. pl. m.* chi, *with* nis, *Ger.* -ra, *N. sg.* pad *with* vi-â, *N. sg. m. past Ptc. Pass. Caus.* *Ind.* asmad, *N. sg.*

the birds having ascertained the vulture killed. Therefore I

ब्रवीमि । अज्ञातकुलशीलस्येत्यादि । इत्याकर्ण्य स

brû, 1 *sg. Pres. Par.* *Bahuv.* -la, *G. sg. m.* *Bahuv.* -di, *Ac. sg. n.* *Ind.* karṇ, *with* â, *Ger.* tad, *N. sg. m.*

say: of one of unknown-family-(and) character, etc. Thus having heard that

जंबुकः सकोपमाह । मृगस्य प्रथमदर्शनदिने भवानप्य-

-ka, *N. sg.* *Avyay.* ah, 3 *sg. Perf. Par.* -ga, *G. sg.* *Ttp.* -na, *L. sg.* -vat, *N. sg. m.* *Ind.*

jackal with anger says: Of the deer on the first-seeing-day you also

ज्ञातकुलशील एव । तत्कथं भवता सहैतस्य

*Bahuv.* -la, *N. sg. m.* *Ind.* *Ind. Ind.* -vat, *I. sg. m.* *Ind.* etad, *G. sg. m.*

one of unknown-family-(and) character just; then how you with of him

स्नेहानुवृत्तिरुत्तरोत्तरं वर्धते ।

*Ttp.* -ti, *N. sg.* *Ind.* vṛidh, 3 *sg. Pres. Âtm.*

the affection-continuance higher-higher grows?

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।

*Ind.* *Karm.* -na, *N. sg.* *Ind.* as, 3 *sg. Pres. Par.* ślâgh, *N. sg. m. Ptc. Fut. Pass.* *Ind.* *Bahuv.* -dhî, *N. sg. m,* *Ind.*

Where a learned-man not is, to be praised there one of little-intellect even,

निरस्तपादपे देशे एरंडो ऽपि द्रुमायते ॥ ६८ ॥

*Bahuv.* -pa, *L. sg. m.* -śa, *L. sg.* -ḍa, *N. sg.* *Ind.* drumâya, 3 *sg. Pres. Âtm.*

in an of trees-deprived place the Eraṇḍa plant even is considered a tree. (68)

अन्यच्च । अयं निजः परो वेति गणना लघुचेतसां ।

-ya, *N. sg. n.* *Ind.* idam, *N. sg. m.* -ja, *N. sg. m.* -ra, *N. sg. m.* *Ind.* *Ind.* -nâ, *N. sg.* *Bahuv.* -tas, *G. pl. m.*

Again and, 'This one of us, a stranger or' thus calculation of the narrow-minded,

उदारचरितानां तु वसुधैव कुटुंबकं ॥ ६९ ॥

*Bahuv.* -ta, *G. pl. m.* *Ind.* *Ttp.* -dhâ, *N sg.* *Ind.* -ka, *N. sg.*

of persons of generous-conduct on the contrary the earth even a family. (69)

यथायं मृगो मम बंधुस्तथा भवानपि । मृगो

*Ind.* idam, *N. sg. m.* -ga, *N. sg.* asmad, *G. sg.* -dhu, *N sg.* *Ind.* -vat, *N. sg. m.* *Ind.* -ga, *N. sg.*

As this deer of me a friend, thus you also. The deer

ऽब्रवीत्। किमनेनोत्तरोत्तरेण। सर्वैरेकत्र विश्रंभालापैः

brû, 3 *sg. Impf. Par.* kim, *N. sg. n.* idam, *I. sg. n.* -ra, *I. sg.* -va, *I. pl. m.* *Ind.* *Ttp.* -pa, *I. pl.*

said: What with this discussion? by all in one place, with confidence-talks,

सुखिभिः स्थीयतां।

-khin, *I. pl. m.* sthâ, 3 *sg. Imp. Pass.*

happy let be remained.

यतः। न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः।

*Ind.* *Ind.* kim-chit, *N. sg. m.* *G. sg. m.* -ra, *N. sg.* *Ind.* kim-chit, *N. sg. m.* *G. sg. m.* -pu, *N. sg.*

For, Not any body of any body the friend, not any body of any body the enemy,

व्यवहारेण मित्राणि जायंते रिपवस्तथा ॥ ७० ॥

-ra, *I. sg.* -ra, *N. pl.* jan, 3. *pl. Pres. Âtm.* -pu, *N. pl.* *Ind.*

through intercourse friends are made, enemies likewise. (70)

काकेनोक्तं। एवमस्तु। अथ प्रातः सर्वे यथाभिमतदेशं गताः।

-ka, *I. sg.* vach, *N. sg. n. past Ptc. Pass.* *Ind.* as, 3 *sg. Imp. Par.* *Ind.* *Ind.* -va, *N. pl. m.* *Karm.* -śa, *Ac. sg.* gam, *N. pl. m. past Ptc. Pass.*

By the crow said: Thus it be. Now in the morning all to ad libitum-place gone.

एकदा निभृतं शृगालो ब्रूते। सखे ऽस्मिन्वनैकदेशे शस्यपूर्णक्षेत्रम-

*Ind.* -ta, *Ac. sg. n. Adv.* -la, *N. sg.* brû, 3 *sg. Pres. Âtm.* -khi, *V. sg.* idam, *L. sg. m.* *Ttp.* -śa, *L. sg.* *Karm.* -ra, *N. sg.*

One day secretly the jackal says: Friend, in this of the wood-one part a corn-filled-field

स्ति। तदहं त्वां नीत्वा दर्शयामि। तथा कृते

as, 3 *sg. Pres. Par.* tad, *Ac. sg. n.* asmad, *N. sg.* yushmad, *Ac. sg.* nî, *Ger.* driś, 1 *sg. Pres. Par. Caus.* *Ind.* kṛi, *L. sg. n. past Ptc. Pass.*

is, that I, thee having conducted, show. Thus done

सति मृगः प्रत्यहं तत्र गत्वा शस्यं खादति। अथ क्षेत्रपतिना

as, *L. sg. n. Ptc. Pres. Par.* -ga, *N. sg.* *Avyay.* *Ind.* gam, *Ger.* -ya, *Ac. sg.* khâd, 3 *sg. Pres. Par.* *Ind.* *Ttp.* -ti, *I. sg.*

being, the deer daily there having gone the corn eats. Now by the field-owner

तद्दृष्ट्वा पाशो योजितः। अनंतरं पुनरागतो

tad, *Ac. sg. n.* driś, *Ger.* -śa, *N. sg.* yuj, *N. sg. m. past Ptc. Pass. Caus.* *Ind.* *Ind.* gam *with* â, *N. sg. m. past Ptc. Pass.*

that having perceived a snare fixed. Thereupon again approached

मृगः पाशैर्बद्धो ऽचिंतयत्। को मामितः कालपाशा-

-ga, *N. sg.* -śa, *I. pl.* bandh, *N. sg. m. past Ptc. Pass.* chint, 3 *sg. Impf. Par.* kim, *N. sg. m.* asmad, *Ac. sg.* *Ind.* *Ttp.* -śa, *Ab. sg.*

the deer by the snares caught thought: Who me from here from the death-snare,

दिव व्याधपाशात्त्रातुं मित्राद्न्यः समर्थः । तत्रां-

| | | | | | | |
|---|---|---|---|---|---|---|
| *Ind.* | *Ttp.* -śa, *Ab. sg.* | trai, *Inf.* | -ra, *Ab. sg.* | -ya, *N. sg. m.* | -tha, *N. sg. m.* | *Ind.* |
| as it were, | from the hunter's-snare | to save, | from the friend | different, | able ? | There |

तरे जंबुकस्तत्रागत्योपस्थितो ऽचिंतयत् ।

| | | | | | |
|---|---|---|---|---|---|
| -ra, *L. sg. n. Adv.* | -ka, *N. sg. m.* | *Ind.* | gam *with* â, *Ger.* | sthâ *with* upa, *N. sg. m. past Ptc. Pass.* | chint, 3 *sg. Impf. Par.* |
| meantime | the jackal | there | having gone, | near-stepped | thought: |

फलिता तावदस्माकं कपटप्रबंधेन मनोरथसिद्धिः । एतस्यो-

| | | | | | |
|---|---|---|---|---|---|
| -ta, *N. sg. f.* | *Ind.* | asmad, *G. pl.* | *Ttp.* -dha, *I. sg.* | *Ttp.* -dhi, *N. sg.* | etad, *G. sg. m.* |
| Fruit-bearing | then | of us | through the deceit-plot | the wish-accomplishment; | of him, |

त्कृत्यमानस्य मांसासृग्लिप्तान्यस्थीनि मयावश्यं प्राप्तव्यानि ।

| | | | | | |
|---|---|---|---|---|---|
| kṛit *with* ud, *G. sg. m. Ptc. Pres. Pass.* | *Ttp.* -ta, *N. pl. n.* | -thi, *N. pl.* | asmad, *I. sg.* | *Ind.* | âp *with* pra, *N. pl. n. Ptc. Fut. Pass.* |
| being cut up, | the flesh-blood-smeared | bones | by me | surely | to be got. |

तानि बाहुल्येन भोजनानि भविष्यंति । मृगस्तं दृष्ट्वो-

| | | | | | | |
|---|---|---|---|---|---|---|
| tad, *N. pl. n.* | -ya, *I. sg.* | -na, *N. pl.* | bhû, 3 *pl. Fut.* ii. *Par.* | -ga, *N. sg.* | tad, *Ac. sg. m.* | dṛiś, *Ger.* |
| They | in abundance | food | will be. | The deer | him | having seen |

ल्लासितो ब्रूते । सखे छिंधि तावन्मम बंधनं । सत्वरं त्रायस्व

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| las *with* ud, *N. sg. m. past Ptc. Pass. Caus.* | brû, 3 *sg. Pres. Âtm.* | -khi, *V. sg.* | chhid, 2 *sg. Imp. Par.* | *Ind.* | asmad, *G. sg.* | -na, *Ac. sg.* | *Avyay.* | trai, 2 *sg Imp. Âtm.* |
| delighted | says: | Friend, | cut | now | of me | the fetter; | quickly | deliver |

मां । यतः ।

| | |
|---|---|
| asmad, *Ac. sg.* | *Ind.* |
| me. | For, |

आपत्सु मित्रं जानीयाद्युद्धे शूरमृणे शुचिं ।

| | | | | | | |
|---|---|---|---|---|---|---|
| -d, *L. pl.* | -ra, *Ac. sg.* | jñâ, 3 *sg. Pot. Par.* | -dha, *L. sg.* | -ra, *Ac. sg.* | -ṇa, *L. sg.* | -chi, *Ac. sg. m.* |
| In misfortunes | a friend | one may know, | in battle | a hero, | in debt | an honest man, |

भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बांधवान् ॥ ७१ ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| -yâ, *Ac. sg.* | kshi, L. *pl. n. past Ptc. Pass.* | -ta, *L. pl.* | -na, L. *pl.* | *Ind.* | -va, *Ac. pl.* | |
| a wife | in lost | riches, | in troubles | and | relations. | (71) |

अपरं च । उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| -ra, *N. sg. n.* | *Ind.* | -va, *L. sg.* | -na, *L. sg.* | *Ind.* | *Ind.* | -sha, *L. sg.* | *Ttp.* -va, *L. sg.* |
| Another | and, | At a festival, | in affliction | and | even, | in dearth, | in reign-revolution, |

राजद्वारे श्मशाने च यस्तिष्ठति स बांधवः ॥ ७२ ॥

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| *Ttp.* -ra, *L. sg.* | -na, *L. sg.* | *Ind.* | yad, *N. sg. m.* | sthâ, 3 *sg. Pres. Par.* | tad, *N. sg. m.* | -va, *N. sg.* | |
| at the king's door, | on the cemetery | and | who | stands, | he | a friend. | (72) |

जंबुको मुहुर्मुहुः पाशं विलोक्याचिंतयत्। दृढस्तावदयं

-ka, *N. sg.* *Ind.* *Ind.* -ṡa, *Ac. sg.* lok *with* vi, *Ger.* chint, 3 *sg. Impf. Par.* -ḍha, *N. sg. m.* *Ind.* idam, *N. sg. m.*

The jackal again-again the snare having eyed thought: Strong so far this

बंधः। ब्रूते च। सखे स्नायुनिर्मिता एते

-dha, *N. sg.* brû, 3 *sg. Pres. Âtm.* *Ind.* -khi, *V. sg.* *Ttp.* -ta, *N. pl. m.* etad, *N. pl. m.*

fetter; says and: Friend, of sinews-made these

पाशास्तदद्य भट्टारकवारे कथमेतान्दंतैः स्पृशामि।

-ṡa, *N. pl.* *Ind.* *Ind.* -ra, *L. sg.* *Ind.* etad, *Ac. pl. m.* -ta, *I. pl.* spriṡ, 1 *sg. Pres. Par.*

snares, therefore to-day on a Sun-day how these with the teeth I touch?

मित्र यदि चित्ते नान्यथा मन्यसे तदा प्रभाते

-ra, *V. sg.* *Ind.* -ta, *L. sg.* *Ind.* *Ind.* man, 2 *sg. Pres. Âtm.* *Ind.* -ta, *L. sg.*

Friend, if in thy mind not otherwise thou thinkest, then in the morning

यत्त्वया वक्तव्यं तत्कर्तव्यं।

yad, *N. sg. n.* yushmad, *I. sg. m.* vach, *N. sg. n. Ptc. Fut. Pass.* tad, *N. sg. n.* kṛi, *N. sg. n. Ptc. Fut. Pass.*

what by thee to be said, that to be done.

इत्युक्त्वा तत्समीप आत्मानमाच्छाद्य स्थितः

*Ind.* vach, *Ger.* *Ttp.* -pa, *L. sg.* -man, *Ac. sg.* chhad *with* â, *Ger.* sthâ, *N. sg. m. past Ptc. Pass.*

Thus having said, of him-in the neighbourhood himself having concealed stood

सः। अनंतरं स काकः प्रदोषकाले मृगमनागतम-

tad, *N. sg. m.* *Ind.* tad, *N. sg. m.* -ka, *N. sg.* *Ttp.* -la. *L. sg.* -ga, *Ac. sg.* *Karm.* -ta, *Ac. sg. m.*

he. Thereupon that crow at evening-time the deer not-returned

वलोक्येतस्ततो ऽन्विष्य तथाविधं दृष्ट्वो-

lok *with* ava, *Ger.* *Ind.* *Ind.* ish *with* anu, *Ger.* -dha, *Ac. sg. m.* dṛiṡ, *Ger.*

having seen, here (and) there having searched, the so-conditioned having seen,

वाच। सखे किमेतत्। मृगेणोक्तं।

vach, 3 *sg. Perf. Par.* -khi, *V. sg.* kim, *N. sg. n.* etad, *N. sg. n.* -ga, *I. sg.* vach, *N. sg. n. past Ptc. Pass.*

said: Friend, what this? By the deer said:

अवधीरितसुहृद्वाक्यस्य फलमेतत्। तथा चोक्तं।

*Karm.* -ya, *G. sg.* -la, *N. sg.* etad, *N. sg. n.* *Ind.* *Ind.* vach, *N. sg. n. past Ptc. Pass.*

Of the slighted-friend's-word the fruit this. Thus and said:

सुहृदां हितकामानां यः शृणोति न भाषितं ।

-d, *G. pl.* *Bahuv.* -ma, *G. pl. m.* yad, *N. sg. m.* śru, 3 *sg. Pres. Par.* *Ind.* -ta, *Ac. sg.*

Of friends well-wishing who hears not the word,

विपत्संनिहिता तस्य स नरः शत्रुनंदनः ॥ ७३ ॥

-pad, *N. sg.* dhâ *with* sam-ni, *N. sg. f.* *past Ptc. Pass.* tad, *G. sg. m.* *N. sg. m.* -ra, *N. sg.* *Ttp.* -na, *N. sg. m.*

adversity near of him; that man an enemy-delighter. (73)

काको ब्रूते । स वंचकः क्वास्ते । मृगे-

-ka, *N. sg.* brû, 3 *sg. Pres. Âtm.* tad, *N. sg. m.* -ka, *N. sg.* *Ind.* âs, 3 *sg. Pres. Âtm.* -ga, *I. sg.*

The crow says: that rogue (jackal) where does he sit? By the deer

णोक्तं । मन्मांसार्थी तिष्ठत्यत्रैव । काको ब्रूते ।

vach, *N. sg. n.* *past Ptc. Pass.* *Ttp.* -thin, *N. sg. m.* sthâ, 3 *sg. Pres. Par.* *Ind.* *Ind.* -ka, *N. sg.* brû, 3 *sg. Pres. Âtm.*

said: For my-flesh-longing he stands there just. The crow says:

उक्तमेव मया पूर्वं ।

vach, *N. sg. n.* *past Ptc. Pass.* *Ind.* asmad, *I. sg.* -va, *Ac. sg. n. Adv.*

Said indeed by me before.

अपराधो न मेऽस्तीति नैतद्विश्वासकारणं ।

-dha, *N. sg.* *Ind.* asmad, *G. sg.* as, 3 *sg. Pres. Par.* *Ind.* *Ind.* etad, *N. sg. n.* *Ttp.* -ṇa, *N. sg.*

'An offence not of me is,' thus not this for confidence-a reason,

विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥ ७४ ॥

vid, 3 *sg. Pres. Pass.* *Ind.* -sa, *Ab. pl. m.* -ya, *N. sg.* -vat, *G. pl. m.* *Ind.*

it is known for from the mischievous danger of the virtuous even. (74)

दीपनिर्वाणगंधं च सुहृद्वाक्यमरुंधतीं ।

*Ttp.* -dha, *Ac. sg.* *Ind.* *Ttp.* -ya, *Ac. sg.* -tî, *Ac. sg.*

Of a lamp-extinction-the smell and, a friend's-word, the star Arundhatî,

न जिघ्रंति न शृण्वंति न पश्यंति गतायुषः ॥ ७५ ॥

*Ind.* ghrâ, 3 *pl. Pres. Par.* *Ind.* śru, 3 *pl. Pres. Par.* *Ind.* dṛiś, 3 *pl. Pres. Par.* *Bahuv.* -yus, *N. pl. m.*

not smell, not hear, not see those whose life-is gone. (75)

परोक्षे कार्यहंतारं प्रत्यक्षे प्रियवादिनं ।

-sha, *L. sg. n.* *Ttp.* -tṛi, *Ac. sg. m.* -sha, *L. sg. n.* *Ttp.* -din, *Ac. sg. m.*

Away from-the eye design-destroying, before-the eye kind words-speaking,

वर्जयेत्तादृशं मित्रं विषकुंभं पयोमुखं ॥ ७६ ॥

vṛij, 3 *sg. Pot. Par.* -śa, *Ac. sg. n.* -ra, *Ac. sg.* *Ttp.* -bha, *Ac. sg.* *Bahuv.* -kha, *Ac. sg. m.*

one should avoid such a friend, a poison-pot having a milk-surface. (76)

ततः काको दीर्घं निःश्वस्य । अरे वंचक किं

*Ind.* -ka, *N. sg.* -gha, *Ac. sg. n. Adv.* śvas *with* nis, *Ger.* *Ind.* -ka, *V. sg.* kim, *N. sg. n.*

Then the crow deeply having sighed: Alas, rogue, what

त्वया पापकर्मणा कृतं । यतः ।

yushmad, *I. sg.* *Bahuv.* -man, *I. sg. m.* kṛi, *N. sg. n. past Ptc. Pass.* *Ind.*

by thee wicked-deeds performing done? For,

संलापितानां मधुरैर्वचोभिर्मिथ्योपचारैश्च वशीकृतानां ।

lap *with* sam, *G. pl. m. past Ptc. Pass. Caus.* -ra, *I. pl. n.* -chas, *I. pl.* *Karm.* -ra, *I. pl.* *Ind.* vaśî-kṛi, *G. pl. m. past. Ptc. Pass.*

Of those addressed with sweet words, with pretended-services and enchanted,

आशावतां श्रद्दधतां च लोके किमर्थिनां वंचयितव्यमस्ति ॥ ७७ ॥

-vat, *G. pl. m.* śrad-dhâ, *G. pl. m. Ptc. Pres. Par.* *Ind.* -ka, *L. sg.* *Ind.* -thin, *G. pl. m.* vañch, *N. sg. n. Ptc. Fut. Pass. Caus.*

of the hopeful, of the confiding and in the world, why of supplicants cheating to be done is? (77)

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापं ।

-rin, *L. sg. m.* śrambh *with* vi, *L. sg. m. past Ptc. Pass.* *Bahuv.* -ti, *L. sg. m.* yad, *N. sg. m.* char *with* sam-â, 3 *sg. Pres. Par.* -pa, *Ac. sg. n.*

Upon the beneficent, the confident, the pure-minded, who practices wickedness,

तं जनमसत्यसंधं भगवति वसुधे कथं वहसि ॥ ७८ ॥

tad, *Ac. sg. m.* -na, *Ac. sg.* *Bahuv.* -dha, *Ac. sg. m.* -vat, *V. sg. f.* *Ttp.* -dhâ, *V. sg.* *Ind.* vah, 2 *sg. Pres. Par.*

that man treacherous, O venerable earth, how dost thou bear? (78)

दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।

*Karm.* -na, *I. sg.* -ma, *Ac. sg. n. Adv.* -ya, *Ac. sg.* -ti, *Ac. sg.* *Ind.* *Ind.* *Ind.* kṛi, 3 *sg. Pot. Par. Caus.*

The wicked man with friendship, affection and also not one should make,

उष्णो दहति चांगारः शीतः कृष्णायते करं ॥ ७९ ॥

-ṇa, *N. sg. m.* dah, 3 *sg. Pres. Par.* *Ind.* -ra, *N. sg.* -ta, *N. sg. m.* kṛishṇâya, 3 *sg. Pres. Âtm.* -ra, *Ac. sg.*

hot burns and the coal, cold it blackens the hand. (79)

अथवा स्थितिरियं दुर्जनानां ।

*Ind.* -ti, *N. sg.* idam, *N. sg. f.* *Karm.* -na, *G. pl.*

Or else the maxim this of the wicked:

प्राक्पादयोः पतति खादति पृष्ठमांसं

prâch, *Ac. sg. n. Adv.* -da, *L. du.* pat, 3 *sg. Pres. Par.* khâd, 3 *sg. Pres. Par.* *Ttp.* -sa, *Ac. sg.*

In front at the feet he falls, he eats of the back-the flesh;

कर्णे कलं किमपि रौति शनैर्विचित्रं ।

-ṇa *L. sg.* -la, *Ac. sg. n.* kim, *Ac. sg. n. Ind.* ru, 3 *sg. Pres. Par.* *Ind.* -ra, *Ac. sg. n.*

in the ear tune some he hums softly a wondrous one ;

छिद्रं निरूप्य सहसा प्रविशत्यशंकः

-ra *Ac. sg.* rûp *with* ni, *Ger.* -has, *I. sg.* viś, *with* pra, 3 *sg. Pres. Par.* *Bahuv.* -ka, *N. sg. m.*

a hole having espied with haste he enters fearless ;

सर्वं खलस्य चरितं मशकः करोति ॥ ८० ॥

-va, *Ac. sg. n.* -la, *G. sg. m.* -ta, *Ac. sg. n.* -ka, *N. sg.* kṛi, 3 *sg. Pres. Par.*

the whole of the wicked conduct the gnat practises. (80)

दुर्जनः प्रियवादी च नैतद्विश्वासकारणं ।

*Karm.* -na, *N. sg.* *Ttp.* -din, *N. sg. m.* *Ind.* *Ind.* etad, *N. sg. n.* *Ttp.* -ṇa, *N. sg.*

A wicked a kind words-speaking and, not this a confidence-reason,

मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषं ॥ ८१ ॥

-dhu, *N. sg. n.* sthâ, 3 *sg. Pres. Par.* *Ttp.* -ra, *L. sg.* -d, *L. sg.* -la, *N. sg. n.* -sha, *N. sg.*

honey stands on the tongue-tip, in the heart Hâlâhala poison. (81)

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन्का-

